# VYAS PANCHANG

## ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)




संस्कृत

VYAS PANCHANG

॥ श्री गणेशाय नमः ॥

वैदिक - पौराणिक मंत्र पूजन सहित :

# ॥ कालसर्पयोग जनन शांति प्रदीपः ॥

॥ प्रत्यक्ष गोदान - प्रयोगादि विविध प्रयोग विभूषितः ॥




अनंतं वासुकिं शेषं पद्मनाभं च कंबलम् । शंखपालं कर्कोटकं कालियं तक्षक तथा ॥
ऐतानि संस्मरेन्नित्यं आयुः कामार्थ सिध्धये । सर्पदोषक्षयार्थं च पुत्रपौत्रान् समृध्धये ।
तस्मै विषभयं नास्ति सर्वत्र विजयी भवेत् ॥

॥ गुजरात राज्य - प्राप्त सपुरस्कार सम्मान पत्र - शास्त्र पंडितः ॥

**पं. विश्वनाथ आनंदराम शास्त्री**

© महादेव रामचन्द्र जागुष्टे बुक्स प्रा. ली., अहमदाबाद

Scanned by CamScanner

श्री गणेशाय नमः ॥
वैदिक पौराणिक मंत्र सहितः

# ॥ कालसर्पयोगजननशान्ति प्रदिपः ॥

प्रत्यक्ष-गोदानादि-विविधप्रयोग-समलंकृतः


संयोजक : संशोधकश्च
गुजरात राज्य प्राप्त सबहुमान सपुरस्कार
ससम्मानपत्र - शास्त्र पंडितः ॥

**पं. विश्वनाथ आनन्दराम शास्त्री**



: प्रकाशक :

**महादेव रामचंद्र जागुष्टे**
**बुक्स डीपो**

त्रण दरवाजा, अहमदाबाद.
फोन नं. : (079) 25354039



सर्व हक्क प्रकाशकने स्वाधिन



सने : २००९

किंमत : 40-00



Scanned by CamScanner

# अनुक्रमणिका


| क्रमांक | विषय | पृष्ठांक |
|---|---|---|
| १ | संकल्पसहित - समस्त मूर्ति - प्रतिष्ठा प्रयोगः । | १-२ |
| २ | नाग-पीठ-यंत्र-पूजा प्रयोगः । | ३ |
| ३ | कालपुरुष-आवाहन-ध्यान मंत्राः । | ४ |
| ४ | मध्यकलशे - अनंत सहिल - राहु केतु वासुकी आवा मंत्राः । | ५ |
| ५ | शेष-पद्मनाभ-कंबल-शंखपाल वै.पो. आवा. मंत्राः । | ६ |
| ६ | क़र्कोटक-कालिय-तक्षक आवाहन - मंत्राः | ७ |
| ७ | नवनाग - वैदिक - पौ. ध्यान - षोडषो० पूजन मंत्राः । | ८ - ११ |
| ८ | होमविधिः- अनंतादि नवनागादि समस्त स्थापित देव होमः । | ११ से २२ |
| ९ | नवनागकलशोदक सहित समस्त काशायोदक अभि० मंत्राः । | २३ - २४ |
| १० | छायापात्रदर्शन - दक्षिणाप्रदान आशीर्वाद मंत्राः । | २४ - २५ |
| ११ | सविधिः प्रत्यक्ष-गोदान - आवा षोडषो. पू. मंत्राः । | २५ - ३८ |
| १२ | श्री दक्षिणामूर्ति स्तोत्रम् (गुर्जरभाषयायुतम्) | ३५ - ४० |
| १३ | श्री देवी षोडषो. पौरा. पूजन मंत्राः । | ४१ - ४२ |
| १४ | श्री नारायण - त्रिशोपचार - पौराणिक मंत्राः । | ४२ - ४४ |
| १५ | पंचरत्न श्री गणेश स्तोत्रम् । | ४४ - ४५ |
| १६ | श्री भगवती स्तोत्रम् । | ४५ |
| १७ | श्री शीव-पार्वती स्तुतिः । | ४६ |
| १८ | मंगलाष्टक - धर्मशास्त्र सूक्तयः । | ४६ - ४८ |
| १९ | शास्त्रोक्त वाग्दान प्रयोगः । | ४९ |
| २० | मनोरथ सिद्धि मंत्राः । | ५० |
| २१ | गणपति सहित समस्तदेवादि नैवेद्य-आरती | ५१ - ५८ |


Scanned by CamScanner

॥ नमःशिवायै च नमःशिवाय ॥

# ॥ संपादकका सविनय निवेदन ॥

नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्द-योगीन्द्रमथास्य शिष्यम् ॥
श्री शंकराचार्यमथास्य पद्म-पादं च हस्तामलकं च शिष्यम् ।
तं त्रोटकं वार्तिककारमन्या- नस्मद् गुरुन् संततमानतोऽस्मि ॥

ભૂતભાવન ભૂતનાથ ભગવાન અને સદ્‌ગુરુની અસીમ કૃપાથી સંસ્કૃત-સંસ્કૃતિ પ્રેમીઓની સેવા કરવાનો અણમોલ અવસર મલ્યો છે. સર્વપ્રથમ ૧૯૭૮માં 'ષટ્કર્મ પ્રદીપ' નામનું પુસ્તક લખ્યું હતું જે ફકત ૧૦૦ પૃષ્ઠનું મૂલમાત્ર હતું. પંડિતોએ પ્રેમથી અપનાયું અને થોડા વખતમાંજ અપ્રાપ્ય બન્યું. પુનઃ પંડિતોની માંગણી થવાથી ૧૯૮૩ માં ધર્મશાસ્ત્રોના પ્રમાણો સાથે સચિત્ર 'ષટ્કર્મ પ્રદીપ' અનેક વિષયો સાથે ૩૦૦ પૃષ્ઠમાં પ્રગટ કર્યું આજે તે પણ અપ્રાપ્ય-છે.

૧૯૯૦ માં સચિત્ર વાસ્તુ શાંતિ પ્રદીપ નામનો ૬૦૦ પૃષ્ઠનો સજીલ્દ સાવરણ દળદાર ગ્રંથ રચાયો જેમાં વૈદિક-પૌરાણિક મંત્રો સાથે વાસ્તુ-નવચંડી-લઘુ-મહારુદ્ર પ્રયોગો સાથે મૂળ-આશ્લેષા વગેરે શાંતિ વિધિયો સસૂકત આપી છે જેમાં ચાર-ચાર રંગના ચિત્રો સાથે અનેક મંડળો વૈષ્ણવો માટે મંગળાચરણ-સ્તોત્રો-આંરતિઓ આપી ગ્રંથને દિવ્ય બનાવ્યો છે જેની જુજ પ્રતો હાલમાં છે જે થોડાજ સમયમાં અપ્રાપ્ય બને તેવો સંભવ છે. આ ગ્રંથો દેશ-વિદેશમાં ભારતીય વૈદિક સંસ્કૃતિનો પ્રચારમાં સહાયરૂપ બન્યો છે તેજ તેનું પ્રમાણપત્ર છે.

અલ્પ સમયથી કાલસર્પયોગની પંડિતો ચર્ચા કરે છે પરંતુ પ્રાચીન ગ્રંથોમાં કોઇપણ ઠેકાણે કાલસર્પયોગ વિષે ઉલ્લેખ નથી. પંડિતોમાં અલગ-અલગ મત મતાંતરો છે.

કેટલાક જોષીઓ આ યોગથી લોકમાનસમાં જે ભય પેદા કરેલ છે કે આધિ-વ્યાધિ અને ઉપાધિ થી સંપૂર્ણ જીવન બરબાદ થઇ જાય અંતિમ સમય સુધી ઉન્નતિ કે ચડતી થાય નહી પરંતુ તેવો ભય રાખવાની જરૂર નથી.

આ વિષય સંબંધી અનેક સુજ્ઞ પંડિતોએ મારી સાથે વાતચીત કરી અને આ વિષયમાં લખવાની વાત કરી. મારા હૃદયમાં પણ વિચારોનું મંથન ચાલતું હતું પણ પંડિતોની માંગણીથી હું સાવધાન બન્યો. અને આ વિષયમાં લખવા માટે પ્રેરાયો પ્રથમતો સદ્‌ગુરુ શ્રી શંકરાચાર્ય ગુરુદેવનું સ્મરણપૂર્વક ધ્યાન ધર્યુ અને ગુરુદેવ હૃદયમંદિરમાં પધાર્યા અને આદેશ આપ્યો અને તે મુજબ "કાલ સર્પયોગ જનન શાંતિ પ્રદીપ" લખાયો જે નીચે મુજબ છે.

Scanned by CamScanner

સર્વ પ્રથમ વિચાર કરતાં કાલસર્પયોગ એટલે શું ? સર્પના કાળ-મૃત્યુમાં જે કારણ બન્યો હોય તેને કાળસર્પયોગ લાગે. કોઇ વખત ઘરમાં કે બહાર સર્પ દેખાય તો સાત્વિક લોક ગભરાય છતાં તેને વંદન કરે દીવો કરે પણ રાજસી કે તામસી પ્રકૃતિનો માણસ તેને પકડે માટલામાં પૂરે-મારે કે મારી નાખે તે માણસના બીજા જન્મની જન્મકુંડલીમાં સર્પનું મુખ રાહુ અને પુંછડી કેતુ આ બન્ને અશુભ ગ્રહોની વચ્ચે સાતેય ગ્રહો સર્પના ભરડાની ભીંસમાં આવવાથી કાળ સર્પયોગ બન્યો ગણાય માટે કાળસર્પયોગની શાંતિ કરવી જોઇએ. તેમાં કાળદેવ અને સર્પ એટલે નવકુલનાગ ની પ્રતિષ્ઠા પૂજન હોમ વગેરે કરવાથી શાંતિ થાય श्री कामः शांतिकामो वा ग्रहयज्ञं समाचरेत ।। શ્રી એટલે લક્ષ્મી તથા સુખશાંતી માટે ગ્રહશાંતિ કરવી જોઇએ. શાસ્ત્રાજ્ઞા પ્રમાણે कालसर्पयोग-जनन्शांतिप्रदीपः ।। ગ્રંથ લખ્યો છે. જેમાં કાળ-ધર્મનું પૂજન તથા સર્પ-એટલે નવ કુળ નાગોનું તથા રાહુ અધિદેવતા તથા કેતુને પ્રત્યધિદેવતા સાથે આવહન-ધ્યાન તથા વૈદિક-પૌરાણિક મંત્રો સાથે ષોડશોપચાર પૂજન તથા ગ્રહહોમ તથા કાળદેવ સાથે અનંતાદિનવનાગ દેવોના ૧૦૮/૨૮/૮ ના ક્રમથી ચાર વિપ્રો દ્વારા ચાર દ્રવ્યોથી હોમ આપી ઉત્તર તંત્ર પૂર્ણાહુતિ-વસોર્ધારા વગેરે કરી श्रेयः संपाद्य दानं च अभिषेको विसर्जनम् ।। અભિષેકમાં પણ વૈદિક-પૌરાણિક મંત્રો સાથે ગ્રંથ પૂર્ણ કર્યો છે અને આપની પાસે રજુ કર્યો છે .

આવિધિ ક્યાં કરવો તે વિષયમાં પણ વિવિધમતો છે. કોઇ નદી કિનારે અથવા નર્મદા કિનારે કરવો એમ કહે છે પરંતુ આ વિધિ ઘરમાં કરવો હિતાવહ છે. શાસ્ત્ર વચન છે કે गृहस्थस्य क्रियाः सर्वा न सिद्ध्यंति गृहं विना ।। પોતાનું ઘર બન્યા પછી ગૃહસ્થી સત્કર્મ ઘરમાં ન કરે તો કર્મ સફળ થતું નથી.

પિતૃમુકિત માટે નારાયણબલિ વિધિ કરવા નર્મદા જવું તે શાસ્ત્રજ્ઞા છે. આપણા ઘરમાં નાગદેવોની પ્રસન્નતા માટે નાગપાંચમે ભીંત પર નાગ દોરી પૂજન કરીએ છીએ તેમ સર્પદોષ ઘરમાં જ થાય માટે આ વિધિ ઘરમાંજ કરવો જોઇએ કારણકે આ દોષના નિવારણથી તથા નાગેંદ્રહાર ભગવાન શંકરના પૂજનથી ઘરનું વાતાવરણ શુદ્ધ થાય છે. ઘરમાં શાંતિ સ્થપાય છે. ઘરમાં વિધિ કરવાથી કુટુંબના બહેન ભાણા વગેરે પ્રેમથી પૂજન-દર્શન અને પ્રસાદનો લાભ મેળવી પવિત્ર થાય. અન્ય તીર્થ સ્થાને કરવા જતાં આર્થિક-માનસિક યાતના થી બચી શકાય. આ વિધિ કર્યા પછી મધ્ય પીઠમાં ચાંદીના કે ત્રાંબાના નાગનું પૂજન કર્યું હોય તે એકજ નાગને મોટા જલ ભરેલા પાત્રમાં મૂકી પાસે નદીના પ્રવાહમાં પધરાવી વંદન કરી શિવસ્મરણ કરતાં ઘેર આવવું. બ્રાહ્મણભોજન કરાવી પરિવાર સાથે પ્રસાદ લેવો. આ રીતે કાળસર્પયોગજનન શાંતિ કરવી પરંતુ આપણી શકિત ન હોય અને કોઇ કહે તો ગભરાવું નહી પ્રારબ્ધભોગ હોય તે

Scanned by CamScanner

ભોગવેજં છુટકો છતાં સાવધાન બની શિવ પૂજન કરવું. મૃત્યુંજયના લાખ જપ કરવા અથવા તો લઘુરુદ્ર અથવા નમઃશિવાય મંત્રનો જપ નિત્ય શિવનાં દર્શન કરવાં સોમવારે એકટંક ભોજન-દીન દરિદ્રને દાન-મોટાઓને વંદન-અહિંસા-સત્યનું આચરણ કરવાથી પણ શિવ પ્રસન્ન થાય અને દોષ નિવારણ થાય. અને સુખ-સંપત્તિ સાથે માનસિક શાંતિ મળે આ રીતે નિર્ભય બની જીવન પસાર કરવું

આ ગ્રંથ જન કલ્યાણ માટે લખાયો છે. ગ્રંથ સાથે સવિધિ ગોદાન પ્રયોગ-દેવીષોડશોપચારના પૂજન મંત્રો-નારાયણના ત્રિંશોપચારમંત્રો-શ્રીશંકરાચાર્યવિરચિત દિવ્ય દક્ષિણા મૂર્તિસ્તોત્ર-ધર્મશાસ્ત્રસૂક્તિઓ સાથે આરતિઓ મૂકી ગ્રંથને સર્વોપયોગી બનાવ્યો છે. જે આપની સમક્ષ મૂકયો છે. છેવટે સતત સ્મરણીય પ.પૂ.માતા-પિતા-પ.પૂ.ફઇબા તથા જે જે ગુરુદેવોએ નિઃસ્વાર્થ ભાવથી ઉત્તમ વિદ્યાદાન આપ્યું જેના પ્રભાવે હું અન્ય પંડિતો માટે માર્ગદર્શક બની શક્યો તેવા વેદ શાસ્ત્ર સંપન્ન ગુરુદેવોના કર કમળમાં આ ગ્રંથ સમર્પણ કરતો આદ્યશંકરાચાર્યના આદેશથી આ ગ્રંથ રચાયો જે હૃદયકમળમાં બિરાજી જે આજ્ઞા આપતા ગયા કઠ પુતળીની માફક લખતો ગયો આમાં જે સારું છે તે ગુરુ કૃપાનું ફળ છે. આમાં મારું કાંઇ નથી હરિૐ તત્સત્ ॥

शनैः कंथा शनैः पन्था शनैः पर्वतमस्तके ।
शनैः विद्या शनैः वित्तं पंचैतानि शनैःशनैः ॥

**॥ पुनन्तु मां ब्राह्मण-पादपांसवः॥**

सवंत २०५१
श्रावण कृष्ण अष्टमी
**जन्माष्टमी**
दिनांक-१८/८/९५
दुरभाष-७४८७९७४

सुज्ञविदुषां वर्शवदः :-
पं.विश्वनाथ आनंदराम शास्त्री,
''कैलास धाम''
२८, साबरमती सोसायटी,
साबरमती कर्णावती - ३८०००५.

Scanned by CamScanner

॥ श्री गणेशाय नमः॥

# ॥ कालसर्प - योगजनन - शांतिप्रदीपः ॥

**अग्रेराहुरधः केतुः सर्वे मध्यं गताः ग्रहाः ।**
**योगोऽयं कालसर्पाख्यो शीघ्रं तं तु विनाशय ॥**
**श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ॥**

आश्लेषा-नक्षत्रदिने-कृष्णचतुर्दश्याम्- अमावास्यायाम्-पंचम्याम् अथवा अनुकुले शुभेदिने अयं विधिः कर्तव्यः ॥

सुखासने कृतनित्यक्रियः यजमानः धौते वाससी परिधाय उपविश्य भस्मधारणपूर्वकं सुतिलकं रक्षाबंधनं कृत्वा देवब्राह्मणान् नमस्कृत्य संकल्पं कुर्यात ।

आदौ प्रायश्चित्तसंकल्पं कृत्वा गोनिष्क्रयीभूतं यथाशक्तिद्रव्यं विप्राय समर्प्य निष्पापो भूत्वा प्रधान संकल्पं कुर्यात् । ॐ विष्णुः विष्णुः इति विष्णुस्मरणं कृत्वा संवत्सरादीन् संकीर्त्य-अमुक गोत्रोत्पन्नः अमुक शर्मा अहं मम - मम पुत्रस्य-वा मम कन्यायाः पूर्वजन्मनि सर्पग्रहण-ताडन अथवा वधादिदोषप्रभावात् अस्मिन् जन्मनि जन्मकुंडल्यां राहु केतु संज्ञक क्रूरग्रहान्तरालस्थित सूर्यादिसकलग्रहजनितकालसर्पनामक-अनिष्टयोगः तेन अनिष्ट योगदोषात् इह जन्मनि अनपत्यता-असाध्यरोगः-विवाहे विलंबः व्यापारे हानिः-समाजे अप्रतिष्ठा-दुःख दारिद्र्य-दौर्भाग्य आदि दोषपरिहारार्थं दीर्घायुः आरोग्य-पुत्रपौत्रादि वंशाभिवृद्धिः ऐश्वर्यप्राप्त्यर्थं नवनागदेवताप्रसन्नताप्राप्त्यर्थं सग्रहमखां कालसर्पयोगजननशांतिं करिष्ये ॥

तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं पुण्याहवाचनं-वसोर्द्धारासमन्वितमातृकापूजनं आयुष्यमंत्रजपं-नान्दिश्राद्धं आचार्यादि वरणम्- अग्निप्रतिष्ठादिकर्म करिष्ये ॥

तत्रादौ दिग्रक्षणादिकं वास्तुशांतिप्रदिपे पृ. ११ तः ८३ पर्यंतं कुर्यात

दिग्रक्षणं-कलशार्चनं कृत्वा तेन जलेन पूजासामग्रीं भूमिं संप्रोक्ष्य पवित्रो भूत्वा गणपतिपूजनं कुर्यात। आदौ गणपत्यादि समस्त मूर्तीनाम एकतंत्रेण प्राणप्रतिष्ठां कुर्यात। गणपत्यादिसमस्तमूर्तयः एकस्मिन पात्रे

Scanned by CamScanner

निधाय-हस्ते जलं गृहीत्वा-देश कालौ संकीर्त्य आसां गणपत्ति-मातृका राहु-केतु सहित नवनागदेव-महारुद्रसहितनवग्रहादीनाम् मूर्तीनां निर्माणविधौ अंग-प्रत्यंग संधि समुत्पन्न-अग्नि तपनताडन-अवधातादि जनितदोषपरिहारार्थं अग्नेः उत्तारणपूर्वकं प्राणप्रतिष्ठां करिष्ये । मूर्तीः धृतेन अभ्यज्य तदुपरि दुग्धमिश्रितजलधारां पातयेत् ॥

**ॐ समुद्रस्यत्वावकयाग्ने परि ०॥ वैदिकमंत्रैः ॥**
**अग्नि वैश्वानरो वह्निः वीतिहोत्रो धनंजयः ॥**
**अग्नेरुत्तारुणार्थाय मूर्तीनां शुद्धिहेतवे ॥**

इति पौराणिकमंत्रं त्रिवारं(३) पठित्वा प्राणप्रतिष्ठां कुर्यात् ॥ अस्यश्रीप्राणप्रतिष्ठा मंत्रस्य ब्रह्मविष्णु-रुद्रा ऋषयः ऋग्यजुःसामाथर्वाणि छंदासि । जगत्सृष्टिकारिणी पराप्राणशक्तिर्देवता । आं बिजं । ही शक्तिः । क्रौं कीलकम्।आसु अमुक-अमुकमूर्तीषु प्राणप्रतिष्ठापनं विनियोगः॥ मूर्तिषु हस्तं निधाय पठेत् ॥

**ॐ आंह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहम् ।**
**आसां मूर्तीनां प्राणाः इह प्राणाः ॥ पुनः ॐ आं ०॥**
**आसां मूर्तीनां जीवाः इह स्थिताः ॥ पुन ॐ आं ०॥**

आसां मूर्तीनां सर्वेन्द्रियाणि वाक्-मनः-त्वक्-चक्षुः-श्रोत्र-जिह्वा-घ्राण-पाणि-पाद-पायु उपस्थानि इह आगत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

**आसां प्राणाः प्रतिष्ठंतु आसां प्राणाः क्षरंतु च ।**
**आसां देवत्वमर्चायै मामहेतीति कश्चन ॥**

ॐ मनोजूति ०॥ एष वै प्रतिष्ठानाम यज्ञो यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥ गणपत्यादिआवाहितदेवाः सुप्रतिष्ठिताःवरदाः भवत गंधादिउपचारांन् दत्वा षोडशसंस्कारसिद्धये षोडशप्रणवावृत्तिं कृत्त्वा अमुक-अमुकमूर्तीनां षोडशसंस्काराःसंपद्यन्ताम् ॥

रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरुढा कराजैः
पाशं कोदंडमिक्षुद भवमथ गुणमप्यंकुशं पंचबाणान् ।
बिभ्राणा सृक्कपालं त्रिनयनविलसत पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः पग नः ॥

इति ध्यात्वा प्रतिष्ठाप्य मूर्तीः शुद्धजलेन प्रक्षाल्य शुद्धवस्त्रेण

प्रोंछयित्वा एकस्मिन् पात्रे संस्थाप्य पूजनसमये कलशोपरि संस्थाप्य पूजयेत् ॥

गणपति पूजनादि प्रयोगः अस्मद् विरचिते वास्तुशांतिप्रदिपे पृ ११तः ८३ पर्यंतं ब्राह्मणवरणांत : प्रयोगः कर्तव्यः ॥ ततः पृ. ८३तः दिग्रक्षणं पंचगव्यकरणं भूम्यादिदेवपूजनं ९१ पर्यंतं कृत्वा हस्तयोः पुष्पांजलिं गृहित्वा उत्थाय –

**ऊर्ध्वं पश्यन् देवान् आवाहयेत् । ॐ स्वस्तिनऽ इन्द्रो वृद्धश्रवाः ०॥ स्वस्तिस्तु याऽविनाशाख्या ०॥** इति पठित्वा ऊर्ध्वं पुष्पांजलिं समर्पयन् वदेत्-देवाःआयान्तु। इतः यातुधानाः अपयान्तु । हे विष्णो देवयजनं रक्ष ॥ भूमौ प्रादेशं कुर्यात् ॥ ततःस्थंडिलसमीपे (कुंडसमीपे वा) भूम्यादीनां स्थापनं पूजनं कुर्यात् ॥ ततः मध्यपीठे कृष्णवस्त्रं प्रसार्य तदुपरि माषैः(अडद) अष्टदलं कृत्वा मध्ये प्रधानं-कलशं संस्थाप्य दिक्षु विदिक्षु अन्यान् अष्टकलशान् तेषु पूर्णपात्रोपरि प्रतिष्ठितनवनागदेवाः संस्थाप्य पूजयेत् ॥

आदौ मध्यकलशपूर्णपात्रोपरि क्षौमं वस्त्रं प्रसार्य पीठ पूजां कुर्यात्। हस्ते अक्षतान् गृहित्वा ॐ मं मंडूकाय नमः ०। आं आधारशक्त्यै०। मूं मूलप्रकृत्यै०। कं कालाग्निरुद्राय ०। आं आदिकूर्माय०। अं अनन्ताय०। आं आदिवराहाय ०। पं पृथिव्यै०। हं हेमगिरये०। नं नन्दनोद्यानाय०। कं कल्पवृक्षाय०। मं मणिभूतलाय ०। दं दिव्यमंडपाय०। सं स्वर्णवेदिकायै०। वै वैराग्याय०। ऐं ऐश्वर्याय०। अं अनैश्वर्याय०। सं सत्वाय०। प्रं प्रबोधात्माने०। रं रजसे०। प्रं प्रकृत्यात्मने०। तं तमसे०। मं मोहात्मने०। सों सोममंडलाय०। सूं सूर्यमंडलाय०। वं वह्निमंडलाय०। मां मायातत्वायं०। विं विद्यातत्वाय०। शं शिवतत्वाय०। ब्रं ब्रह्मणे०। मं महेश्वराय०। आं आत्मने०। अं अन्तरात्मने०। पं परमात्मने०। जं जीवात्मने०। ज्ञां ज्ञानात्मने०। कं कन्दाय०। नं नीलाय०। पं पद्माय०। मं महापद्माय०। रं रत्नेभ्यः ०। कं केसरेभ्यः ०। कं कर्णिकायै०। प्रतिष्ठा सर्वदेवानां०। पीठदेवताः सुप्रतिष्ठिताः भवत। पीठदेवताभ्यो नमः सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि॥

इति पीठपूजां कृत्वा-तदुपरि भूर्जपत्रे अथवा तांबुलोपरि बिंदु-त्रिकोण-षट्कोण-चतुरस्र-अष्टकोण यंत्रं कृत्वा तदुपरि सर्पाकारआकृति

Scanned by CamScanner

आग्नेय्यां-गरुडाय०।
कृत्वा यंत्रं संपूजयेत्। यथा-मध्ये अनंतायनमः
नैऋत्ये व्यासाय०। वायव्यां दुर्गायै०। ईशाने सरस्वत्यै०। पूर्वे ऐश्वर्याधिपतये
वरुणाय०। दक्षिणे धर्माधिपतये सोमाय०। प्रतिष्ठा सर्व देवानाम्-इति
प्रतिष्ठाप्य यंत्रस्थदेवताभ्यो नमः सर्वोपचारार्थं गंधाक्षतपुष्पाणि समर्पयामि
नमस्करोमि । मध्यपीठस्य पूर्वादिदिक्षु विदिक्षु अष्टौ भैरवान् स्थापयेत्
- यथा पूर्वे असितांगभैरवाय नमः। आग्नेय्याम् - रुरुभैरवाय०। दक्षिणे-
चंडभैरवाय०। नैर्ऋत्याम्-क्रोधभैरवाय०। पश्चिमे-उन्मत्तभैरवाय०। वायव्याम्
कपालभैरवाय०। उत्तरे-भीषणभैरवाय नमः ॥ ऐशान्याम्-संहारभैरवाय
०। प्रतिष्ठा सर्वदेवानाम्०॥ इति प्रतिष्ठाप्य असितांगादिभैरवेभ्यो
नमः सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ ततःमध्येपीठस्य
दक्षिणस्यां दिशि एकस्मिन् पूगीफलोपरि कालपुरुषं आवाह्य पूजयेत्०।
हस्ते अक्षतान् गृहित्वा ध्यायेत्०।

### ध्यानमंत्रः।

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि ।
समापोऽ अद्‌भिरग्मत समोषधीभिरोषधीः ॥ ६-२८॥

एह्येहि दंडायुध धर्मराज कालांजनाभासविशालनेत्र ॥
विशालवक्षस्थल रुद्ररूप गृहाण पूजां भगवन्नमस्ते ॥

यमो निहन्ता पितृधर्मराजः वैवस्वतो दंडधरश्च कालः
प्रेताधिपो दत्तकृतानुसारि कृतांत एतत् दशभिर्जपंति ॥
चित्रगुप्तादीसंयुक्त दंडमुद्गरधारक ।
आगच्छ भगवन्काल (धर्म)पूजार्थं संनिधो भव ॥
प्रतिष्ठा सर्वदेवानां मित्रावरुणानिर्मिता ।
प्रतिष्ठां ते करोम्यत्र कालपुरुष आवह ।

श्री कालाय नमः कालं आवाहयामि स्थापयामि ॥ कालपुरुषाय
नमः सर्वोपचारार्थे गंधाक्षत-पुष्पाणिं समर्पयामि। हस्ते गंधाक्षतपुष्पाणि
गृहित्वा नामपूजां कुर्यात्। ॐ यमाय नमः। धर्मराजाय०। मृत्यवे०।
अंतकाय०। वैवस्वताय०। कालाय०। सर्वभूतक्षयाय०। औदुंबराय०।
दध्नाय०। नीलाय०। वृकोदराय०। चित्राय०। चित्रगुप्ताय०। इति
संपूज्य प्रार्थयेत०।

महिषस्थ नमस्तेऽस्तु धर्मराज नमोऽस्तु ते। ईषत्पीन नमस्तेऽस्तु दंडहस्त नमोऽस्तु ते॥
धर्मराज महाकाय दक्षिणाधिपतये नमः। रक्तेक्षण महाबाहो मम पीडां निवारय॥

इति प्रार्थयित्वा हस्ते जलम् आदाय अनेन-पूजन-प्रार्थना कर्मणा कालः प्रीयताम् ।

**(१) ततः मध्यकलशे अनंतं स्थापयेत् ।**

ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपं कुणृते द्योरुपत्स्थे । अनन्तमन्न्यद्द्रुपदस्य पाजः कृष्णमन्न्यद् धरितःसंभरन्ति॥३३-३८॥

**अनंतं सर्वनागाना-मधिपं विश्वरूपिणम् । जगतां शांतिकर्तारं मंडले स्थापयाम्यहम् ॥**

**योऽसावनंतरूपेण ब्रह्मांडं सचराचरम् । पुष्पवद् धारयेत् मूर्ध्नि तस्मै नित्यं नमो नमः ॥**

**अनंतं विप्रवर्णं च तथा कुंकमवर्णकम् । फणासहस्रसंयुक्तं तं देवं स्थापयाम्यहम्॥**

विप्रवर्णाय कुंकुमरूपाय सहस्त्रफणामंडलविभूषिताय श्री अनंताय नमः अनंतं आवा० स्थाप०॥ अनंतस्य दक्षिणपार्श्वे राहुं स्थापयेत्०।

ॐ कया नश्चित्रऽ आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥३६-८॥

**विष्णुना च शिरःछित्वा ग्रहभावे नियोजितः ॥ उग्रचंडः प्रचंडस्तं राहुं तं स्थापयाम्यहम् ॥**

**अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥**

राहवे नमः राहुं आवाहयामि स्थापयामि ॥ अनंतस्य वामपार्श्वे केतुं स्थापयेत्।

**ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या ऽअपेशसे । समुषद्भिरजायथाः॥२९-३७॥**

**एकोत्तरशतकेतुन् ब्रह्मपुत्रान् महाबलान् । साक्षिभूतांस्तु लोकानां तं केतुं स्थापयाम्यहम् ॥**

**पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणाम्यहम् ॥**

केतवे नमः केतुम् आवाहयामि स्धापयामि ॥

**(२) पूर्वकलशे-वासुकिं स्थापयेत् ।**

ॐ देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥३-५०॥

**क्षत्रवर्णं पीतरूपं फणैःसप्तशतैर्युतम् । युवतमुत्तुंगकायं च वासुकिं स्थापयाभ्यहम् ॥**

क्षत्रीयवर्णाय पीतरूपाय सप्तशतफणामंडल विभूषिताय श्री वासुकये नमः वासुकिम् आवा ० स्थाप ०॥

**(३) आग्नेयकलशे-शेषं स्थापयेत्-**

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्त्थिवानि विममे रजागुंसि ।

Scanned by CamScanner

योऽअस्कभायदुत्तरगूं सधस्थं विचक्रमाणस्त्रेधोरुगायो व्विष्णवे त्वा ॥५-१८॥

विप्रवर्णं श्वेतरूपं सहस्रफणसंयुतम् । स्थापयामि च तं देवं शेषं वै विष्णुरूपिणम्

विप्रवर्णाय श्वेतरूपाय सहस्रफणामंडलविभूषिताय उत्तुंगकायाय श्री शेषाय नमः शेषम् आवा ० स्थाप ०॥

(४) दक्षिणकलशे-पद्मनाभं स्थापयेत् –

ॐ उग्रं लोहितेन मित्रगूं सौव्रत्येन रुद्द्रं दौर्व्रत्येनेन्द्रंप्रक्रीडेन मरुतो बलेन साद्ध्यान्प्रमुदा । भवस्य कण्ठ्यगूं रुद्रस्यान्तः पार्श्व्यम्महादेवस्य यकृच्छर्वस्य व्वनिष्ठुः पशुपतेः पुरीतत् ॥३९-९॥

वैश्यवर्णं नीलरूपं फणीःपंचशतैर्युतम् । युक्तमुत्तुंगकायं च पद्मनाभं नमाम्यहम् ॥

वैश्यवर्णाय नीलरूपाय पंचाशतफणामंडलविभूषिताय श्री पद्मनाभाय नमः पद्मनाभम् आवा ० स्थाप ०॥

(५) नैर्ऋत्यकोणे-कंबलं स्थापयेत् –

ॐ सीसेन तंत्रं मनसा मनीषिणऽऊर्ण्णासूत्रेण कवयो व्वयन्ति । अश्विना यज्ञगूं सविता सरस्वतीन्द्रस्य रूपं व्वरुणो भिषज्यन ॥१९-८०॥

कंबलं शूद्रवर्णं च शतत्रयफणैर्युतम् । स्थापयामि च नागेशं प्रणमामि पुनःपुनः ॥

शूद्रवर्णाय नीलरूपाय त्रिंशत्फणामंडल विभूषिताय श्री कंबलाय नमः कंबलम् आवा ० स्थाप ०॥

(६) पश्चिमकलशे-शंखपालं स्थापयेत्

ॐ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे महागयम् । उपयामगृहितोऽ स्यग्नये त्त्वा व्वर्च्चसऽ एष ते योनिरग्नये त्त्वा व्वर्च्च से ॥२६-९॥

शंखपालं क्षत्रवर्णं पीतं सप्तशतैर्युतम् ॥ युक्तमुत्तुंगकायं च शिरसा प्रणाम्यहम् ॥

क्षत्रियवर्णाय पीतरूपाय सप्तशतफणामंडलविभूषिताय श्री शंखपालाय नमः शंखपालम् आवा ० स्थाप ०॥

(७) वायव्यकोणे-कर्कोटकं स्थापयेत् –

ॐ सोमाय कुलुंगऽआरण्यो जो नकुल शका ते पौष्णाः क्रोष्टा

मायोरिन्द्रस्य गौरमृगः पिद्वो न्यंकुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः॥२४-३२॥

**शूद्रवर्णं श्वेतरूपं शतत्रयफणायुतम् । युकतमुत्तुंगकायं च कर्कोटकं नमाम्यहम् ॥**

शूद्रवर्णाय श्वेतरूपाय त्रिंशतफणामंडलविभूषिताय श्री कर्कोटकाय नमः कर्कोटकम् आवा ० स्थाप ०॥

## (८) उत्तरकलशे-कालियं स्थापयेत् -

ॐ पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य नाक्रो मकरः कुलीपयस्तेऽ कूपारस्य ह्रियै शलल्यकः॥२४-३५॥

**कालियं पन्नगांधीशं फणानेकशतं बलम् । कालाग्निमिवदुर्धर्षं तेजसादित्यसनिभम् ॥**
**दिव्यांबरधरं दीप्तं रत्नकुंडलमंडितम् । ब्रह्मांडाधारभूतं तं यमुनांतरवासिनम् ॥**

शूद्रवर्णाय कृष्णरूपाय अनेकशतफणामंडलविभूषिताय श्री कालियाय नमः कालियम्-आंवा ० स्थाप ०॥

## (९) ऐशानकलशे-तक्षकं स्थापयेत् -

ॐ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुंजिष्ठेभ्यश्यꣳवो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१६-२७॥

**वैश्यवर्णं नीलरूपं फणैः पंचशतैर्युतम् । युक्तमुत्तुंगकायं च तक्षकं स्थापयाम्यहम् ॥**

वैश्यवर्णाय नीलरूपाय पंचाशतफणामंडलविभूषिताय श्री तक्षकाय नमः तक्षकम् आवा ० स्थाप ०॥

ॐ **मनोजूतिर्ज्जुषतामाज्जयस्य** ०॥ प्रतिष्ठा सर्वदेवानाम् ०॥ इति प्रतिष्ठाप्य रा.के.सहित अनंतादि नवनागदेवाः सुप्रतिष्ठाताः वरदाः भवत ॥

Scanned by CamScanner

# अथ पूजनमंत्रा :-

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ॥ याऽइषवो यातुधानानाँ ये वा वनस्पतीँ१ऽरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतन्तेभ्यः सर्पेभ्यो नमः ॥ १३-६।७।८॥

**पूजने विशेष :- नीलवस्त्रं-कुंकुनं चंदनं-अगुरु चंदन-नील पुष्पाणि नीलाक्षताः लाक्षाधूपः-घृतदीपः-माषान्ननैवेद्यम् ॥**

**ध्यान मंत्रा :-**

अनन्तं वासुकिं शेषं पद्मनामं च कंबलम् ।
शंखपालं कर्कोटकं कालियं तक्षकं तथा ॥
अनन्ताद्यान्महाकायान् नानामणिविराजितान् ।
ध्यायामि चैतान्सर्पान् पातालतलवासिनः ।
सर्पदोष-विनाशाय सर्पान्वन्दे शिवाय नः॥

राहु-केतु सहित अनन्तादि नवनागदेवेभ्यो नमः ध्यायामि ध्यानार्थे पुष्पाणि समर्पयामि ॥

**आसन मंत्रा :-**

ॐ पुरुषऽएवेदगं सर्वं ०॥

**स्थिरो भव वीड्वंगऽ आशुर्भव वाज्यर्वन् ।**
**पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः॥ ११-४४॥**

पृथ्वीस्वरूपासनमेव यत्र त्वमेव लोकस्य चराचरस्य ।
तत्रासनं किं भगवन् प्रदेयं प्रदीयते पुष्पमिदं गृहाण ॥

राहु-केतु सहित अनंतादिनवनागदेवेभ्यो नमः **आसनार्थे पुष्पाणि समर्पयामि ॥**

**पाद्यमंत्रा :-** ॐ एतावानस्य महिमातो ०॥ तद्विष्णोःपरमं पदगूं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥६-५॥

Scanned by CamScanner

धरं स्थितं निर्मल रौक्मपात्रे समाहृतं बिंदुसरोवराद्धि ।
अनंत नागेश जगद्धर प्रभो गृहाण पाद्यं प्रणमामि पादौ ॥

राहु-केतु स० अनंतादि नव० नमः पाद्यं सम० ०॥

**अर्घ मंत्रा :-** ॐ त्रिपादूर्ध्वमुदैत्पुरुषः ०॥ ॐ हिरण्यपाणिः सविता विचर्षणि रुभे द्यावा पृथिवीऽ अन्तरीयते। अपामीवां बाधते ते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥३४-२५॥

**सिद्धार्थगंधकुसुमाक्षतपूगदुर्वा-**
**तोयैरलं तिलयवैरभिपूर्णपात्रम्**
**आधारमूर्धनि समर्पितमुक्तमंत्रै-**
**रर्घं गृहाण जगदीश दयार्द्रदृष्टे ॥**

**रा.के.सहित अनंतादिनव० नमः अर्घं सम ०॥**

**आचमनमंत्रा :-** ततो विराडजायत०॥ ॐ सुमित्रिया न ऽ आप ऽओषधयः सन्तु दुर्मियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥३५-१२॥३६-२३॥३८-२३॥

**सहस्त्रफणिरूपेण वसुधाधारक प्रभो ।**
**गृहाणाचमनं देव पावनं च सुशीतलम् ॥**

**रा.के. सहित अनंतादिनव०नमः आचमनं सम०॥**

**स्नान मंत्रा :-** ॐ तस्मा द्यज्ञात्सर्वहुतः०॥ ॐअपो देवा मधुमतीरगृभ्णन्नुर्जस्वती राजस्वश्चितानाः । याभिर्मित्रावरुणावभ्यषिंचन् याभिरिन्द्रिमनयन्नत्यरातीः ॥१०-१॥

**गंगादिसर्वतीर्थैस्त्वा मभिषिंयामि भूधर ।**
**बलभद्रावतारेश अनन्त श्रीपते सखे ॥**

**रा.के.सहित अनंतादि नमः स्नानं सम०॥**

**पंचामृतस्नानमंत्रा :-** पंचनद्यःसरस्वती ०॥ ॐ तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥१९-९॥

Scanned by CamScanner

पयो दधि घृतं चैव मधु च शर्करा तथा ।
पंचामृतं मयाऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥

रा.के.सहित अनन्तादि नमः एकतंत्रेण पंचामृतस्नानं सम ०॥

गन्धोदकस्नानमंत्रा : ॐ गन्धर्वस्त्वा विश्वावसु ०॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा ॥ ९-१॥

मलयाचलसंभूतं चन्दनागरुसंभवम् ।
चन्दनं शेष देवेश स्नानार्थं प्रतिगृह्यताम् ॥

रा.के.सहित अनंतादि नमः गन्धोदकस्नानं सम ०॥

उद्वर्तनस्नानमंत्रा :- ॐ अगूंशुना तेऽअंगू शुः ०॥

ॐ जिह्वा मे भद्रं वाङ्‌ महो मनो मन्युः स्वराड् भामः । मोदाः प्रमोदाऽ अंगुलीरंगानि मित्रं मे सहः ॥२०-६॥

नाना सुगंधिद्रव्यं च चांपेयादिसमन्वितम् ।
उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

रा.के.सहित अनंतादि नमः उद्ववर्तनस्नानं सम ०॥

तीर्थोदक स्नानमंत्री- : ॐ ये तिर्थानी प्रचरंति ०॥

हरिमदांबुजानर्मदामही-सरयुचन्द्रभागाभ्य आहृतम् ।
जलजवासितं स्नानहेतवे शेष गृह्यतामर्पितं जलम् ॥

रा.के.सहित अनंतादि नमः ०॥ तीर्थोदकस्नानं सम ०॥ शुद्रधोदकेन स्नपयामि ॥ स्नानशालायां पंचोपचारैः वा मानसोपचारैः पूजयेत् ॥

लं पृथिव्यात्मकं गंधं परिकल्पयामि ।
हं आकाशात्मकं पुष्पं परिकल्पयामि ।
यं वायव्यात्मकं धूपं परिकल्पयामि ।
वं अमृतात्मकं नैवेद्यं परिकल्पयामि ।
सं सोमात्मकं तांबूलं परिकल्पयामि ।

सर्वोपचारार्थे गंधाक्षतपुष्पैः संपूज्य अथवा मानसोपचारैः संपूज्य उत्तरं निर्माल्यं विसृज्य पुनः गंधाक्षतपुष्पैः संपूज्य रुद्रसूक्तेन महिम्नः

Scanned by CamScanner

स्तौत्रेण वैदिक सर्पसूक्तेन संकल्पानुसारं वा अभिषेकं कुर्यात् ॥

धारापात्रं गंधादिना पूजयेत् ॥

ॐ अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥२२-२५॥

अनंत वासुकिं शेषं पद्मनाभं च कंबलम् ।
शंखपालं कर्कोटकं कालियं तक्षकं तथा ॥
एतानि संस्मरेन्नित्यमायुः कामार्थसिद्धये ।
सर्पदोषक्षयार्थं च पुत्रपौत्रान् समृद्धये ।
तस्मै विषभयं नास्ति सर्वत्र विजयी भवेत् ॥
अनंताय नमस्तेऽतु नमस्ते वासुके तथा ।
नमस्ते शेषनागाय पद्मनाम नमोऽस्तु ते ॥
कंबलाय नमस्तुभ्यं शंखपाल नमोऽस्तु ते ।
कर्कोटक नमस्तुभ्यं कालियाय नमो नमः ।
नमस्ते तक्षकायाथ नागदोषहराय च ॥
एतत् स्तोत्रं पठेन्नित्यं नागदेवस्य सन्निधौ ।
सर्पदोषविमुक्तःसन् सर्व सौख्यं लभेन्नरः ।
एतैत्त सर्पाः शिवकंठभूषाः लोकोपकाराय भुवं वहंतः ।
भूतैः समेतामणिभूषितांगाः गृह्णीत पूजां परमां नमो नमः ॥

शुद्धोदक स्नानमंत्रा :- ॐ शुद्धवालः सर्वशुद्धवालो ०॥ ॐ वाचन्ते शुन्धामि प्राणन्ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रन्ते शुन्धामि नाभिन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्राँस्ते शुन्धामि ॥ ६-१४॥

श्री जाह्नवीजलमयं सरसं सुधावत्
चैलालवंगशुभगंधमनोभिरामम् ।
हे वासुके कनकपात्रधृतं मया ते
स्नानं गृहाण जगदीश मयाऽर्पितं ते ॥

Scanned by CamScanner

रा.के. सहित अनंतादि नमः शुद्धोदकस्नानं सम ०।। देवान् शुद्धवस्रोण प्रोंछयित्वा

**वस्त्रमंत्रा :** ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः ०।। ॐ उषानक्ता वृहती बृहन्तं पयस्वती सुदुधे शूरमिन्द्रम् । तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ।। २० - ४१।।

**सर्वभूषाधिके सौम्ये लोकलज्जानिवारके ।**
**मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।**

**रा. के. सहित अनंतादि ० नमः वस्त्रोपवस्त्रे सम०।।**

**यज्ञोपवीतमंत्राः-** ॐ तस्मादश्वाऽअजायन्त०।। ॐ व्रतं कृणुताग्नि ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ।। देवीं धियं मनामहे सुमृडीकामभिष्टये वर्च्चोधां यज्ञवाहसगूं सुतीर्थानो असद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ।।४-११।।

यज्ञोपवीतं त्रिगुणीकृतं यत् सुवर्णसूत्रैर्ग्रथितं च भक्त्या ।
निवेदये ते सुखकारि देव नागेश सूत्रं परिगह्यतांगे ।।

रा. के. सहित अनंतादि ० नमः यज्ञोपवीतं सम०।। वस्त्र यज्ञोपवीतांते आचमनीयं सम०।।

**अलंकारा :-** अनेक रत्नान्चितहेमकुंडले माणिक्यसंकाशित कंकणद्वयम् ।।
**हेमांगुलीयं कृतरत्नमौलिकं हेमं किरीटं फणिराज तेऽर्पितम् ।।**
**रा. के. सहित अनंतादिनमः अलंकारान् सम०।।**

**गंधमंत्रा :-**ॐ तं यज्ञं बर्हिषि प्रौक्षन ०।। ॐ ऋताषाड् ऋतधामाग्निर्गंधर्वस्तस्यौऽषधयोप्सरसो मुदो नाम । सनऽ इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ।।१८-३८।।

**कर्पूरयुक्त शशिरोचनेन कस्तुरिकाचन्दनलेपनाद्यैः ।**
**युक्तं तथा कुंकुमकेसराद्यैः गन्धं अनन्ताय निवेदयामि ।।**

**रा.के. सहित अनंतादि ० नमः गंधं सम०।।**

Scanned by CamScanner

**अक्षतमंत्रा :-** ॐ अक्षन्नमीदन्तह्यव ०॥ ॐ वाजो नो ऽ अद्य प्रसुवाति दानं वाजो देवाँ २ऽ ऋतुभिः कल्पयाति । वाजो हि मा' सर्ववीरं जजान विश्वाऽ आशा वाजपतिर्जयेयम् ॥ १८-३३॥

**कलमसंभवा मोक्तिकोपमाः त्रिपथगोदकैः क्षालिताः शिवाः ।**
**अमरुकुंकुमैर्मिश्रितावरा अनन्त गृह्यतामर्पिताक्षताः ॥**

**रा.के. सहित अनंतादि ० नमः अक्षतान् सम०॥**

**पुष्पमंत्रा -** यत्पुरुषं व्यदधुः कतिधा ०॥ ॐ द्यांमा लेखीरन्तरिक्षं मा हिगूंसीः पृथिव्या संभव । अयगूं हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौमगाय अतस्त्वं देव व्वनस्पते शंतवल्शो विरोह शतवल्शा वि वयगूं रुहेम ॥५-४३॥

**मदारकुंदकरवीरलवंगपुष्पैः त्वां देव संततमहं परिपूजयामि ।**
**जातीजपाकनकपंकजमोगरादि नानाविधानि कुसुमानि च तेऽर्पयामि ॥**

**रा.के. सहित अनंतादि ० नमः पुष्पाणि सम०॥**

**अंगपूजा :-** ॐ सहस्रफणाय नमः पादौ पूजयामि ॥ गूढगुल्फाय नमः गुल्फौ पूज०॥ हेमजंधाय नमः जंधे पूज०। मंदतीव्रगतये० जानुनी पूज ०। कंचुकीधराय नमः कटी पूज ०। गंभीरनाभाय नमः नाभिं पूज ०। वातरशनाय ० उदरं पूज ०। मणिधराय ० हस्तौ पूज ०। उरगाय ० स्तनौ पूज ०। कालियाय ० कंठ पूज ०। विषवक्त्राय ० वक्त्रं पूज ०। फणाधराय ० ललाटं पूज ०। सुलक्षणाय ० शिरः पूज ०। अनंताय ०। सर्वांगं पूजयामि । नाम पूजा- ॐ उरगाय ०। पन्नगाय ०। शंकरभूषणाय ०। अनंतफणाभूषणाय ०। पातालवासिने ०। यमुनांतर्वासिने ०। नागेन्द्राय ०। नागकन्यापरिवृताय ०। नागलोकाधिपतये ०॥ अवकाशः स्यात् तदा अष्टोत्तर, शत नामभिः पुष्पाणि समर्पयेत् ॥ अथ अष्टोत्तरशत नामानि । (आदौ प्रणवः अंते नमः योजयेत्) ॐ अनंताय नमः । शेषाय ०। तक्षकाय ० वासुकिने ० शंखपालाय ० कंबलाय ० ककोर्टकाय ० महापद्माय ० कालियाय ० कुलिकाय ० (१०) फणिराझे ० स्थिराय ० प्रभवे ० भीमाय ० प्रवराय ० वरदाय ० मणिमंडल भूषिताय ० सर्वात्मने

० सर्वविख्याताय ० महाबलाय ० (२०) सर्वस्मै ० सहस्रपदे ० गूढगुल्फाय ० हेमजंधाय ०दिगंबराय ० गंभीराय ० वाताशनाय ० उरगाय ० कालियाय ० कंबुकंठाय ० (३०) विषकलाय ० मणिभूषणाय ० सुलक्षणाय ० सर्वज्ञाय ० भवाय ० गरिम्णे ० गर्विणे ० सर्वांगाय ० सर्वभावनाय ० सर्वभूतहराय ० (४०) वृत्तये ० निवृत्तये ० नियंताय ० शाश्वताय ० ध्रुवाय ० भगवते ० अर्हणाय ० अभिवाद्याय ० महाकर्मणे ० उन्मत्ताय ० (५०) प्रच्छन्नाय ० सर्वलोकप्रतापाय ० महारूपाय ० महाकायाय ० पन्नगाय ० शंकरभूषणाय अनंतशिखिने ० पातालवासिने ० महायशसे ० विश्वरूपाय ० (६०) महाहनवे ० लोकपालाय ० अंतर्हितात्मने ० प्रसादाय ० पवित्राय ० महते ० नियमाय ० नियमाश्रिताय ० यमुनान्तर्वासिने ० योगिने (७०) विषग्रहाय ० विषहंत्रे ० नागेन्द्राय ०। शौरये ० नागकन्यापरिवृताय ०। नागलोकाधिपतये ०। अपराजिताय ० स्वकर्मणे ०। सर्वभूताय ० आवये ०। (८०) अविकाराय ०। निधये ०। सहस्राक्षाय ०। विशालाक्षाय ०। शनये ०। केतवे ०। ग्रहाय ० ग्रहपतये ० कालघ्ने ० विश्वरूपिणे ० (९०) विश्वात्मने ० जगत्पतये ० सर्वभूतात्मने ० सर्वेश्वराय ० चंचलाय ० चपलाय ० महाबलाय ० उत्कंठाय ० अंबुजाय ० अहिर्बुध्नाय (१००) अमितविक्रमाय ० अपराजिताय ० आदिनाथाय ० अग्निनेत्राय ० अग्निवपुषे ० अत्रिपुत्राय ० अनधाय ० आदिनाथाय ० (१०८) इति अष्टोत्तरशतनामानि ॥

**सौभाग्यद्रव्यमंत्रा :-** ॐ अहिरिव भोगैः पर्येति ०॥ ॐ सुसन्दृशं त्वा वयं मधवन् वन्दिषीमहि । प्र नूनं पूर्णबन्धुर स्तुतो यासि वशाँऽ अनु योजान्विन्द्र ते हरी ॥३-५२॥

**श्वेताबिरेण सहितं शुभरक्तचूर्णम्**
**सिंदूरचूर्णविपुलान्वितपीतचूर्णम् ॥**
**कर्पूरकेसरसुगन्धिसुवासितं च**
**सौभाग्यचूर्णं मुररी कुरु देवदेव ॥**

**रा.के. सहित अनंतादि ० नमः सौभाग्य द्रव्याणि सम०**

**धूपमंत्रा :-** ॐ ब्राह्मणोस्य मुखमासीद् ०॥ ॐ वसवस्त्वा धूपयन्तु गायत्रेण छन्दसांगिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन

छन्दसांगिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसांगिरस्वद् विश्वे त्वा देवा वैश्वानरा धूपयन्त्वा नुष्टुमेन छन्दसांगिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥११-६०॥

**कालागुरोश्च धृतमिश्रितगुग्गलस्य धूपो मया विरचितो भवतः पुरस्तात् ।**
**आघ्रायतां शुचिमनोहरगंधचूर्णं तूर्णं विनाशय कंबल मोहजालम् ॥**

**रा० के० सहित अनंतादि ० नमः ० धूपम् आघ्रापयामि**

**दीपमंत्रा :-** चन्द्रमा मनसो जातश्चक्षोः ०॥ ॐ आयुष्मानग्ने हविषावृधानो धृतप्रतीको धृतयोनिरेधि । धृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥३५-१७॥

**तमो हारिणं ज्ञानमूर्तिं मनोज्ञं लसद्वर्तिकर्पूरशुद्धाज्ययुक्तम् ।**
**अये पद्मनाम प्रभो विश्वरूप स्फुर ज्ज्योतिषं दीपमंगीकुरुस्व ॥**

**रा० के० सहित अनंतादि ० नमः दीपं दर्शयामि ॥**

**नैवेद्य मंत्रा -:** ॐ नाभ्याऽआसीदन्तरिक्षगूं ०॥ ॐ मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥ ६-३१॥

**कल्पितमद्य धियामृतकल्पं दुग्धसितायुतमन्नविशेषम् ॥**
**माषविनिर्मितपूपसहस्त्रं स्वीकुरु शेष निवेदनमाद्ये ॥**

रा० के० सहित अनंतादि ० नमः नैवेद्यं निवेदयामि ॥

**मूलमंत्रेण संप्रोक्ष्य धेनुमुद्रया अमृतीकृत्य**

वामहस्तं पद्माकारं कृत्वा दक्षिणहस्तेन ग्रासमुद्राः प्रदर्शयेत् - यथा तर्जनी - मध्यमा - अंगुष्ठ योगेन ॐ प्राणाय स्वाहा । मध्यमा - अनामिकांगुष्ठयोगेन ॐ अपानाय स्वाहा । कनिष्ठका-अनामिका अंगुष्ठयोगेन ॐ व्यानाय स्वाहा । तर्जनी-अनामिका अंगुष्ठयोगेन ॐ उदानाय स्वाहा । सर्वांगुलिभिः ॐ समानाय स्वाहा । एवं पंचमुद्राः प्रदर्श्य ततः स्वात्मदेवानां मध्ये जवनिकां धृत्वा भुंजानान् देवान् विभाव्य द्वादशवारं अनंतादिनवनागेभ्यो नमः इति मंत्रं जपेत । जवनिका अपाकृत्य

Scanned by CamScanner

एलोशीरलवंगादि - कर्पूरपरिवासितम् ।
प्राशनार्थे कृतं तोयं गृहाण परमेश्वर ॥

मध्ये पानीयं सम ०। पुनः आचारात् पंचप्राणाहुतीः दद्यात् ततः पूर्वापोशनम् सम०। उत्तरापोशनं सम ० हस्तप्रक्षालनं सम ० मुखप्रक्षालनं सम ० आचमनीयं सम ० करोहोवर्तनार्थे गंधयुक्तं पुष्पं सम ०॥

**नमस्ते देव देवेश सर्वतृप्तिकरं परम् ।**
**अखंडानंद संपूर्ण गृहाण जलमुत्तमम् ॥**
**सर्वतृप्तिकरं तोयं सुगंधि च पिबेच्छेया ।**
**त्वयि तृप्ते जगत्सर्वं नित्यतृप्ते महात्मनि ॥**
**भोजनांते यथेच्छं सुगंधिजलं समर्पयामि ।**

**पूगीफलतांबूलमंत्रा :-** ॐ यत्पुरुषेण हविषा देवा०॥ ॐ उत स्मास्य द्रवतस्तु रण्यतः पर्ण्णं न वेरनुवाति प्रगर्द्धिनः । श्येनस्येव ध्रजतोऽ अंकसं परि दधिकाव्णः सहोर्ज्जा तरित्रतः स्वाहा ॥ ९-१५॥

**एलालवंगक्रमुकादिसंयुतं नागेश जातीमृगनाभिवासितम् ।**
**तांबूलवल्लीदलवीटिकामयं तांबूलंगीकुरु ते मुखे ऽर्पितम् ॥**
**रा० के० सहित अनंतादि ० नमः तांबूल सम ०॥**

**दक्षिणामंत्रा :-** ॐ हिरण्यगर्भः समवर्त्तताग्रे ०॥ ॐ इमं नो देव सवितर्यज्ञं प्रणय देवाव्यगूं सखिविदगूं सत्राजितं धनजितगुं स्वर्जितम् । ऋचा स्तोमगूं समर्धय गायत्रेण रथन्तरं बृहद् गायत्रवर्त्तनि स्वाहा ॥११-८॥

**निखिलप्राणिनां श्रेष्ठ भोगदा निगमसंमता कर्मपूर्णता ।**
**सकलभूजनैः वांछिता सदा शेष दीयते दक्षिणा मया ॥**
**रा० के० सहित अनंतादि ० नमः दक्षिणां सम ०॥**

**नीराजन मंत्रा :-** ॐ अग्नि देवता वातो देवता ०॥ ॐ इदगूं हविः प्रजननं मेऽअस्तु दशवीर गूं ०॥ ॥१९-८८॥

**कर्पूर गौरं करुणावतारम् ०॥ सर्वमंगलमागल्ये ०॥**
**मंगलं भगवान् विष्णुः ०॥**

Scanned by CamScanner

रा० के० सहित अनंतादि ० नमः आरार्तिकयं दर्शयामि ॥

जलेन प्रदक्षिणीकृत्य पुष्पैः देवाभिवन्दनं स्वात्माभिवंदनम् । हस्तप्रक्षालनम् ।

**पुष्पांजलिमंत्रा** :- ॐ यज्ञेन यज्ञमयजन्त ०॥ ॐ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ २२-२९॥

**चरणकमलयुग्मं पंकजैः पूजयित्वा**
**कनककमलमालां कंठदेशेऽर्पयित्वा ॥**
**शिरसि विनिहितोऽयं मंत्रपुष्पांजलिस्ते**
**हृदयकमलमध्ये देव हर्षं तनोतु ॥**

**रा० के० सहित अंनतादि ० नमः मंत्रपुष्पाजलिं सम ०॥**

**प्रदक्षिणा मंत्रा** :- ॐ सप्तास्यासन्परिधयस्त्रिः ०॥ ॐ परीत्य भूतानि परीत्य लोकान परीत्य सर्वाः प्रदिशो दिशश्च । उपस्त्थाय प्रथमजामृतस्यात्मनात्मानमभि सं विवेश ॥३२-११॥

**पदे पदे या परिपूजकेभ्यः सद्योऽश्व मेधादिफलं ददाति ।**
**तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि ॥**

**रा० के० सहित अनंतादि ० नमः प्रदक्षिणा सम ०॥**

**विशेषार्थ मंत्रा** :- ॐ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा होरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहाऽऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्या गुं स्वाहा चंद्रायस्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहोषधीभ्यः स्वाहा ॥२२-२८॥

रक्ष रक्ष नागदेव रक्ष त्र्यैलोक्यरक्षक ।
भक्तानामभयंकर्ता त्राता भव भवार्णवात् ॥
वरद त्वं वरं देहि वांछितं वांछितार्थद ।
अनेन फलदानेन फलदोऽस्तु सदा मम ॥

Scanned by CamScanner

श्रीफलं श्रीपदं प्रोक्तं श्री फलं सुखवर्धनम् ।
श्रीफलार्धप्रदानेन प्रीयतां परमेश्वर ॥

रा० के० सहित अनंतादि ० नमः विशेषार्धफलं सम ०॥

प्रार्थना मंत्रा : नमोऽस्तु सर्पेभ्यो ये के ०॥ सहस्रशीर्षा पुरुषः सहस्राक्षः ०॥

ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु मे सदा ॥
विष्णुलोके च ये सर्पाः वासुकि प्रमुखाश्च ये । नमोऽस्तु ०॥
रुद्रलोके च ये सर्पाः तक्षकप्रमुखास्तथा । नमोऽस्तु ०॥
खांडवस्य तथा दाहे स्वर्ग ये च समाश्रिताः । नमोऽस्तु ०॥
सर्पसत्रे च ये सर्पाः आस्तिकेन च रक्षिताः नमोऽस्तु ०॥
प्रलये चैव ये सर्पाः कर्कोटकप्रमुखाश्च ये । नमोऽस्तु ०॥
धर्मलोके च ये सर्पाः वैतरण्यां समाश्रिताः । नमोऽस्तु ०॥
ये सर्पाः पार्वतीयेषु दरीसंधिषु संस्थिताः । नमोऽस्तु ०॥
ग्रामे वा यदि वारण्ये ये सर्पा बिलसंस्थिताः । नमोऽस्तु ०॥
रसातले च ये सर्पाः अनंताद्यामहाबलाः । नमोऽस्तु ०॥

कल्याणरूपं फणीराजमग्र्यं नानाफणामंडलराजमानम् ।
भक्त्यैकगम्यं जनताशरण्यं भजाभ्यहं नः स्वकुलाभिवृद्ध्यै ॥

अनंतः प्रति गृहणाति अनंतो वै ददाति च ।
अनंतस्तारको ह्यस्मान् अनंताय नमो नमः ॥
अनंतकामान्मे देहि सर्वकर्मफलप्रद ।
अनंताय नमस्तुभ्यं पुत्रान्पौत्रांश्च वर्धय ॥

ॐ नवकुलाय विद्महे । विषदंताय धीमहि । तन्नः सर्पः प्रचोदयात् ॥
ॐ भुजंगमाय विद्महे । चक्षुः श्रोत्राय धीमहि । तन्नः सर्पः प्रचोदयात् ॥
ॐ तत्पुरुषाय विद्महे । कद्रुवंशाय धीमहि । तन्नः सर्पः प्रचोदयात् ॥

रा० के० स अनंतादि ० नमः प्रार्थना पूर्वकं नमस्कारान् सम ०॥

Scanned by CamScanner

क्षमापनमंत्रा :-

आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥
मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया शेष परिपूर्ण तदस्तु मे ॥

**रा० के० सहित अनंतादि ० क्षमापनं प्रार्थयामि ॥**

**हस्ते जलमादाय :-** अनेन पूर्वसंकल्पानुसारेण ध्यान आवाहन- आसन- पाद्य- अर्ध - आचमन - स्नान - वस्त्रोपवस्त्र - यज्ञोपवीत - गंधाक्षतपूष्प - धूप - दीप - नैवेद्य - तांबूल - दक्षिणा - आरार्तिक्य - मंत्रपुष्पांजलि - प्रदक्षिणा - प्रार्थनां - क्षमापनादि कर्मणा राहु - केतु सहित अनंतादि नवनागदेवाः प्रीयंताम् ॥ कृतं कर्म ब्रह्मार्पणम् अस्तु ॥

**ॐ विष्णवे नमः ॐ विष्णवे नमः ॐ विष्णवे नमः**

**अथ होमविधि :-** हस्तप्रमाणं स्थंडिलं वा कुंडं विधाय ब्राह्मणद्वारा अग्निप्रणयादिकं कुर्यात् । दिग्रक्षणं पंचगव्यादिकं (वास्तु शान्ति प्रदीपे) पृ. ८६ तः ९१ वत् कृत्वा कुंडपूजन विधिना १८३ तः १५८ कुंडपूजनं यथासमय अग्निं प्रतिष्ठाप्य १५८ तः १६२ प्रबोध्य ध्यायेत ! ततः ईशान्यां दिशि १६८ तः १८७ वत् नवग्रहस्थापनं महा- रुद्रस्थापनं पूजनं च विधाय १९० तः २०१ पर्यतं कुशकंडिकां कुर्यात् ।

आधार-आज्य-भागहोमं कृत्वा बलवर्द्धननामानम् अग्निं संपूज्य द्रव्यत्याग संकल्पं कुर्यात् । यथा उपकल्पितं समित् चरु-तिल-आज्यादि हवनीयद्रव्यं या या यक्ष्यमाणदेवताः ताभ्यः ताभ्यः मया परित्यक्तं न मम- यथा दैवतमस्तु होमारंभं कुर्यात् । आदौ गणपतये वराहुतिं दद्यात् । ॐ गणानान्त्वा गणपति गूं ०॥ स्वाहा-अथवा- वक्रतुंडमहा- काय०॥ ह्री गणपतये स्वाहा अत्र न त्यागः ॥

ततः नवग्रहादिभ्यः २०१ तः २१० पर्यंतं समित चरु तिल-आज्यादि द्रव्यैः यथाविधि होमं कुर्यात । एवं ग्रहहोमं समाप्य स्विष्टकृत द्रव्यं एकस्मिन पात्रे संरक्ष्य अत्र प्रधान

कालसर्पदेवहोमं कुर्यात् । अथ प्रथमं कालदेव होमः । यथा पायस-तिल समित् अथवा यव-आज्य द्रव्यैः प्रतिद्रव्यं चत्वारो विप्राः होमं कुर्युः । यथा –

**ॐ कार्षिरसिसमुद्रस्य त्वा क्षित्या उन्नयामि । समापोऽ अद्भिरग्मत समोषधीभिरोषधीः ॥६-२८॥ स्वाहा अथवा**

अनाकारमनंताख्यं वर्तमानं दिने-दिने । कलाकाष्ठादिरूपेण कालामावाहयाम्यहम् । स्वाहा अथवा नाममंत्रेण कालाय स्वाहा । इति वैदिक - पौराणिकमंत्रेण वा नाममंत्रेण यथासमय अष्टोत्तरशताहुतिः जूहुयात् । अत्र प्रमाणम् ॥

**प्रणवादिचतुर्थ्यंतं स्वाहाशब्दसमन्वितः । स्यात्पीठदेवता होमे मंत्रो नामैव कीर्तितः ॥**
**होमे स्वाहाऽन्तिमाः प्रोक्ताः पूजायां च नमोऽतकाः ॥**

**प्रधान सर्पदेवता होमः** अपि पूर्ववत् । यथा ॐ नमोऽस्तु सर्पेभ्यो ०॥ वैदिक मंत्रेण । स्वाहा अथवा

**महाफणिधरान्नित्यं पाताल तलवासिनः । सर्पदोष विनाशाय सर्पान्वंदे शिवाय नः ॥**

इति पौराणिकमंत्रेण अथवा नाममंत्रेण ॐ अनंतायः स्वाहा । अष्टोत्तर शताहुतिः जुहुयात् । एवमेव चतुर्भिर्द्रव्यैः अधिदेवता ॐ कयानश्चिऽत्रऽ आभु ०॥ स्वाहा २८ अथवा अर्धकायं महावीर्यम् ०॥ स्वाहा अथवा राहवे स्वाहा । इति नाममंत्रेण अष्टाविंशति आहुतिभिः होमः । एवमेव प्रत्यधिदेवता ॐ केतुं कृण्वन्न केतवे ० स्वाहा । अथवा पलाशपुष्पसंकाशम् ०॥ स्वाहा- अथवा केतवे स्वाहा इति नाम मंत्रेण अष्टाविंशतिभिः होमः ॥ एवमेव चत्वारो विप्राः तैरेव चतुर्भिः द्रव्यैः वासुकादि तक्षकान्तानां प्रत्येकस्य अष्टामिः अष्टाभिः आहुतिभिः होमः ॥ यथा ॐ वासुकये स्वाहा ॥८॥ ॐ शेषाय स्वाहा ॥८॥ ॐ पद्मनाभाय स्वाहा ॥८॥ ॐ कंबलाय स्वाहा ॥८॥ ॐ शंखपालाय स्वाहा ॥८॥ ॐ कर्कोटकाय स्वाहा ॥८॥ ॐ कालियाय स्वाहा ॥८॥ ॐ तक्षकाय स्वाहा ॥८॥ तदनंतरं असितांगादि भैरवानां तैरेव द्रव्यैः अष्टाभिः अष्टाभिः आहुतिभि होमः यथा ॐ असितांग भैरवाय स्वाहा ॥८॥ ॐ रुरुभैरवाय ०।८॥ चंडभैरवाय ॥८॥ ॐ क्रोधभैरवाय ०॥८॥ ॐ उन्मत्तभैरवाय ०॥८॥ ॐ कपालभैरवाय

०॥८॥ ॐ भीषणभैरवाय ०॥८॥ ॐ संहारभैरवाय ०॥८॥ इति होमं कृत्वा सर्वाणि द्रव्याणि एकीकृत्य मंडूकादि पीठ देवता यंत्रदेवताश्च तैरेव संमिलितद्रव्यैः एकैकया आहुत्या होमः ॥ यथा मंडूकाय स्वाहा । आधारशक्त्यै ०। मूलप्रकृत्यै ०। कालाग्निरुद्राय ०। आदिकूर्माय ०। अनंताय ०। आदिवराहाय ०। पृथिव्यै ०। अमृतार्णवाय ०। रत्नाधिर्पाय ०। हेमगिरये ०। मणिभूतलाय ०। दिव्यमंडपाय ०। स्वर्णवेदिकायै ०। रत्नसिंहासनाय ०। धर्माय ०। ज्ञानाय ०। वैराग्याय ०। ऐश्वर्याय ०। अनैश्वर्याय ०। सत्वाय ०। प्रबोत्मने ०। सोममंडलाय ०। सूर्यमंडलाय ०। वह्निमंडलाय ०। मायातत्वाय ०। विद्यातत्वाय ०। शिवतत्वाय ०। ब्रह्मणे ०। महेश्वराय ०। आत्मने ०। अन्तरात्मने ०। परमात्मने ०। जीवात्मने ०। ज्ञानात्मने ०। कंदाय ०। नीलाय ०। पद्माय ०। महापद्माय ०। रत्नेभ्यः ०। केसरेभ्यः ०। कर्णिकायै ०॥ इति होमं कृत्वा तिलद्रव्येण आज्यद्रव्येण वा अष्टोत्तरसंख्यया (१०८) व्याहृति होमः। ॐ भूर्भुवः स्वः स्वाहा ।१०८। अथवा ह्रीं अग्नि-वायु-सूर्येभ्यः स्वाहा १०८॥ ततः नवग्रह फलहोमः। गुग्गल-सर्षप लक्ष्मीहोमः ॥ एवं होमं समाप्य-- पूजा स्विष्टं नवाहुत्यः बलिः पूर्णाहुतिः ॥ ततः स्थापनक्रमेण उत्तरपूजनं कृत्वा स्विष्टकृत् होमं नवाहुतिश्च जुहुयात् । तथा यथासमय पृथक् अथवा एकतंत्रेण दिक्पाल क्रमेण बलिदानं तथा गणपत्यादिदेवताभ्यः स्थापनबलिदानं दद्यात् । क्षेत्रपाल बलिदानं कृत्वा हस्तौ पादो प्रक्षाल्य अपः स्पृशेत् । तदनंतरं पूर्णाहुति होमं कुर्यात् । स्रुचिमध्ये संस्कृतं आज्यं चतुर्वारं संपूर्य तदुपरि गंधाक्षतपुष्पसौभाग्यद्रव्यैः संपूजितं नारिकेलं निधाय उत्थाय पूर्णाहुति मंत्रान् पठेत्। यथा-समुद्रादुर्म्मि मधुमाँ ०॥ (२३४ तः २३५ । अथवा-ऋषिरुवाच शक्रादयः सुरगणानिहतेऽतिवीर्ये ०। पठित्वा

पूर्णाहुति श्रीफलं दक्षिणहस्ते गृहित्वा प्रदिप्ते अग्नौ स्वाहा इति उक्त्वा जुहुयात्। इदम् अग्नये वैश्वानराय वसु-रुद्र-आदित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यश्च न मम-इति· प्रोक्षण्यां संस्रवप्रक्षेपः।

**अथ वसोर्धारा होम :-** ॐ सप्त ते अग्ने समिधः॥ (२३६ तः २३७) पठेत् अथवा-रात्रिसूक्तं विश्वेश्वरीं जगद्धात्रीं स्थिति-संहार कारिणीम् ०॥ पठित्वा-स्वाहा इदम अग्नये न मम॥ इति ब्रूयात्-अत्र

Scanned by CamScanner

संस्रवप्रक्षयः न कर्तव्यः किंतु अग्निप्रदिक्षणां कुर्यात् ।। यथा -
अग्नेनय सुपथा राये ०।। अथवा अग्निं प्रज्वलितं वंदे ०।। इति अग्निं
प्रदक्षिणी कृत्य स्वासने उपविशेत् ।। स्रुवेण ईशानकोणात् भस्म गृहित्वा
धारयेत् ॐ त्र्यायुषं जमदग्नेः ०।। अथवा

श्रद्धां मेधां यशःप्रज्ञां विद्यां पुष्टिं श्रियं बलम् ।
तेजः आयुष्यमारोग्यं देहि मे हव्यवाहन ।।

संस्रवं प्राशनम् । पवित्राभ्यां मार्जनम् । वह्नौ पवित्रप्रत्तिः
ब्रह्मणे पूर्णपात्र दानम् । पश्चिमे प्रणीता विमोकः तेन विमोदकेन
जलेन दर्भैः यजमानशिरसि मार्जनम् ।। आपः शिवाः शिवतमाः ०।।
भगं ते वरुणो राजा०।। उपयमन कुशान् अग्नौ जुहुयात् । ततः प्रसाद
वितरणार्थं नैवेद्यं कृत्वा आरार्तिकं कुर्यात् । आरार्तिकं-
प्रज्वाल्य ज्वालामालिन्यै नमः इति गंधाक्षत्-पुष्पैः संपूज्य उत्याय आरार्तिकं
कुर्यात ।

ॐ इद गूं हविः प्रजननंमे ०। ॐ अग्नि दैवता ०।

जयदेव जयदेव जय अनंत राजन्प्रभु जय अनंत राजन् ।
भवसागर भवतारक (२) नमामि फणिराजन्-जयअनंत० ।।१।।
संसारार्णव पालक निशदिन जगपालं प्रभु निशदिन ०।
फणिधर वासुकि राजन् (२) शेषं शंखपालम् । जयअनंत० ।।२।।
शंकर भूषणरूपम् यमुनांतरवासि प्रभु यमुनांतरवासि ०।
कालिय शिरसि खेलं (२) पद्मनाभदेवम् जय अनंत० ।।३।।
फणिधर कंबलस्वरूपं नवनागं देवं प्रभु नवनागं देवम् ।।
तक्षकशक्तियुक्तं (२) कर्कोटक देवम् । जय अनंत० ।।४।।
आस्तिक मुनिरादेशं सर्पः पालयति प्रभु सर्पः ०।।
श्रावण सितपंचम्यां (२) क्षीरं प्राशयति जय अनंत० ।।५।।
मुखमध्ये द्वे जिह्वे पीयूषं गरलं ०।। प्रभु पीयुषं ०।।
श्रवणं तव चक्षुभ्यां (२) द्रुतुवेगात् चलसि । जय० ।।६।।
विविध स्वरूपं देहं मणिमस्तकधारं प्रभु मणिमस्तक ०।
त्रिपुरारि मुरारि (२) भुजंगपति चारि । जय अनंत०।। ।।७।।
कर्पूरगोरं करुणावतारम्०।। मंगलं भगवान विष्णुः ०।। सर्व मंगलमांगल्ये
०।। रा.के.सहित अनंतादि नमः नीराजनं समर्पयामि। जलेन प्रदक्षिणीकृत्य

पुष्पैः देवाभिवंदनम् । स्वात्माभिवंदनम् । हस्तौ प्रक्षाल्य मंत्र पुष्पांजलिः ॐ यज्ञेन यज्ञमयजन्तदेवाः ०। यथा समय प्रार्थना कर्तव्या-

ततः आचार्यः नवनागकलशोदकं रुद्रकलशोदकं तथा वनस्पति पत्र-चर्म-काषायोदकं तीर्थोदकं च एकस्मिन् पात्रे एकीकृत्य उत्तराभिमुखं सबालं यजमानं उत्तराभिमुखाः विप्राः शिक्यादौ शतछिद्रं कुंभं शूर्पम् वा अन्तर्धाय वैदिक वा पौराणिकमंत्रैः अभिसिंचेयुः-अभिषेक मन्त्राः वास्तु शान्ति प्रदीपे २४७ पृष्ठे दृष्टव्याः।। यथासमय आनुकूल्येन मंत्रैः अभिषेकः कर्तव्यः ।।

यथा-ॐ पयः पृथिव्याम् ०।। पंच नद्यः सरस्वती ०।। आपोहिष्ठा मयो भुवस्तान ०।। तत्वायामि ०।। मानस्तोके तनये ०।। पवित्रेस्थो वैष्णव्यौ ०।। आपो अस्मान् ०।। पुनन्तु मादेवजनाः ०।। पुनन्तु मा पितरः ०।। चित्यतिर्म्मा पुनातुः ०।। द्यौः शान्तिः ०।।

**पौराणिक मंत्रा :-**

योऽसौ वज्रधरो देवः । महेन्द्रो गजवाहनः।
सर्पजातं शिशोर्दोषं मातापित्रोःव्यपोहतु ।।१।।

योऽसौ शक्तिधरो देवः हुतभुक् मेषवाहनः।
सप्तजिह्वश्व देवाग्निः सर्पदोषं व्यपोहेतु ।।२।।

योऽसौ दंडधरो देवः धर्मो माहिषवाहनः ।
सर्पजातं शिशोर्दोषं व्यपोहतु यमो मम ।।३।।

योऽसौ स्वड्गधरो देवः निर्ऋतिःराक्षसाधिपः ।
प्रशामयतु सार्पोत्थं दोषं सर्पसमुद्भवम् ।।४।।

योऽसौ पाशधरो देवः वरुणश्च जलेश्वरः ।
नक्रवाहःप्रचेतानो सर्पदोषं व्यपोहतु ।।५।।

योऽसौ देवः जगत्प्राणः मारुतो मृगवाहनः ।
प्रशामयतु सार्पोत्थं दोषं जातस्य शान्तिदः ।।६।।

योऽसौ निधिर्पतिदेवः खड्गभृद् वाजिवाहनः ।
मातापित्रोःशिशोश्चैव सर्पदोषं व्यपोहतु ।।७।।

योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः।
कालसर्पसमुद्भूतं दोषमाशु व्यपोहतु ।।८।।

विघ्नेशःक्षेत्रप :दुर्गा लोकपाला नवग्रहाः।
सर्पदोष-प्रशमनं सर्वे कुर्वन्तु शान्तिदाः ।।९।।

Scanned by CamScanner

सुरास्वामिषिचंतु ब्रह्माविष्णु महेश्वरा ०॥
कालसर्पजदोषस्य मातापित्रोः जनस्य च ।
भ्रातृ-ज्ञाति-कुलोत्थानां सर्वे कुर्वन्तु शान्तिदाः ॥१०॥

अमृताभिषेकोऽस्तु । शान्तिःपुष्टिः तुष्टिश्चास्तु ॥

अभिषेकानंतरं शुद्धजलेन स्नात्वा शुद्धवस्त्राणि परिधाय स्वासने उपविश्य कुंकुमतिलकं कुर्यात् । कांस्यपात्रे घृतं प्रपुर्य आज्ये पुत्रपत्न्योः-मुखं पश्येत् । तत्र मंत्रः-

ॐ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदो विभजतु। ऋतस्य पथा प्रेत चन्द्र दक्षिणा विस्वःपश्य व्यन्तरिक्षं यतस्व सदस्यैः॥७-४५॥

आज्यं तेजःसमुददिष्टं आज्यं पापहरमं परम्। आाज्यं सुराणामाहारः आज्ये लोकाःप्रतिष्ठिताः॥
अलक्ष्मीः यच्च दौर्भाग्यं मर्मगात्रेष्वस्थितम् । तत्सर्वं शमयन्वाज्यं लक्ष्मी पुष्टिं च वर्धय॥

छायायात्रं सदक्षिणं कस्मैचित् विप्राय दद्यात्॥ कृतस्य कर्मणः सांगता सिद्ध्यर्थ व्रतेभ्यः ब्राह्मणेभ्यः पूजनपूर्वकं दक्षिणाप्रदानं करिष्ये ।

दक्षिणाप्रदानं कृत्वा आचार्यादिविप्रेभ्यः आशिषो गृह्णीयात् ।

आशीर्वाद मंत्रा :- ॐ पुनस्वाहित्त्या रुद्रा व्वसवः समिन्धतां पुनर्ब्रह्माम्णो वसुनीथ यज्ञैः। धृतेन त्वन्तन्वं व्वद्र्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥१२-४४॥

स्वस्त्यतु ते कुशलमस्तु चिरायुरस्तु ।
गोवाजीहस्तिधनधान्य सिमृद्धिरस्तु ।
ऐश्वर्यमस्तु बलमस्तु रियुक्षयोऽस्तु
वंशे सदैव भवतां हरिभक्तिरस्तु ॥
आयुस्ते नरवीर वर्धतु सदा हेमन्तरात्रिर्यथा
लोकानां प्रियदर्शनो भवसदा हेमन्तसूर्यो यथा ।
शत्रूणामति दुःसहो भव सदा हेमन्ततोयं यथा
नाशं यान्तु तवारयोऽपि सततं हेमन्तपद्मं यथा ॥
या श्रीः पद्मवने कदम्बशिखरे राजगृहे कुंजरे
श्वेते चाश्वयुते वृषे च युगले यज्ञे च यूपस्थिते ।
शंखे देवकुले नरेन्द्रभवने गंगातटे गोकुले
सा श्रीः तिष्ठतु सर्वदा तव गृहे भूयात्सदा निश्चला ॥

Scanned by CamScanner

यावद भागीरथी गंगा यावद्देवो महेश्वरः । यावद् वेदाःप्रवर्तन्ते तावत्त्वं विजयी भव ॥
मन्त्रार्थाः सफलाःसन्तु पूर्णाःसन्तु मनोरथाः । शत्रूणां बुदद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

**श्रीःवर्चस्वं आरोग्यं आयुष्यं धनं धान्यं पशुं सुपुत्रलाभं शतसंवत्सरं दीर्घंआयुः ॥ आराध्य देवताः प्रसन्नाःसंतु ॥**

देवविसर्जनम् - ॐ उतिष्ठ ब्रह्मणस्पते देवयन् तस्त्वे महे । उप प्रयन्तु मरुतः सुदानवऽइन्द्र प्राशुर्भवा सचा ॥ ३८-५६ ॥

यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥

अग्निविसर्जनम्-अग्नें नय सुपथा रायेऽअस्मा न्विश्वानि देव वयुनानि विद्यान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽ उक्तिं विधेम् ॥५-३६॥ इति नमस्कृत्य-विसर्जनम्

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥८-२२॥

गच्छ त्वं भगवन्नग्ने स्वस्थाने विश्वतोमुख ।
हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादेवो देवाः तत्र गच्छ हुताशन ॥

संपूर्णता वाचनम्-अंजलिं बद्ध्वा-ब्रूयात् यत्कृतं सग्रहमखं कालसर्पजनन शांत्याख्यं कर्म तत् कालहीनं भक्तिहीनं शक्तिहीनं द्रव्यहीनं श्रद्धाहीनं भवतां ब्राह्मणानां वचनात् नवकुलनाग देवतानां प्रसादाच्च सर्वंपरिपूर्णं आच्छिद्रं चास्तु विप्राः वदेयुः सर्वं परिपूर्णम् अच्छिद्रम अस्तु ॥

यस्य स्मृत्या च नामोक्त्या । तपो यज्ञक्रियादिषु ।
न्यूनं संपूर्णता याति सद्यो वंदे तमच्युतम् ॥
ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः ॥

# ॥ इति कालसर्पयोगजनन शान्ति प्रदीपः ॥

Scanned by CamScanner

## ।। सविधिः प्रत्यक्षगोदान-प्रयोगः ।।

**गौरेकस्यैव दातव्या श्रोचियाय कुटुंबिने ।**
**सा हि तारयते पुर्वान् सप्त सप्त च सप्त च ।।**
**सुशीला लक्षणवतीं युवतीं वत्ससंयुताम् ।**
**बहुदुग्धवतीं स्निग्धां धेनुं दद्यात् विचक्षणे ।।**

गोदानकर्ता कृतनित्यक्रियः पुण्यकाले सुभासने उपविश्य । शिखाबन्धनम् कुशपवित्रधारणम् । आचमनं प्राणायामः । कुंकुमतिलकं रक्षाकंकणबन्धनं कृत्वा शान्तिसूक्तं पठेत् ।

देव-ब्राह्मणान् नमस्कृत्य संकल्पं कुर्यात् । अद्येत्यादि एवं ग्रहगण विशेषेण विशिष्टायां शुभपुण्यतिथौ अमुक गोत्रोत्पन्नः अमुकनामा यजमानः अहंमम इह जन्मनि कायिक-वाचिक-मानसिक-स्पर्शास्पर्श-भक्ष्या भक्ष्य-चोष्याचोष्य-लेह्यालेह्य-आदि समस्तपाप क्षयपूर्वकं मम समस्तपितृणाम् आत्मनश्च विष्णुलोकप्राप्त्यर्थं इह जन्मनि आयुः आरोग्य-ऐश्वर्य प्राप्तिपूर्वकं पृथ्वीदानसमफलप्राप्ति अर्थं श्रीमहाविष्णुःप्रीत्यर्थं यथाशक्तिअलंकृतां प्रत्यक्षगोदानशुभकर्म अहं करिष्ये ।।

तत्रादौ दिग्रक्षणं कलशाराधनं दीप-सूर्य पूजनं कृत्वा गणपति पूजनं स्मरणं वा कृत्वा प्रत्यक्षां गाम् आनीय सविधिगोपूजनं कुर्यात् ।।

हस्ते गन्धाक्षतं पुष्पसहितं सजलं कलशं गृहिंत्वा उत्थाय गोमुख प्रदेशात् आरभ्य परितः जलधारां पातयेत् तथा सर्वांगोपरि प्रोक्षणं कुर्यात् ।। तम मंत्रः यथा-

**या लक्ष्मीः सर्वलोकेषु या च देवेष्वस्थिता ।**
**धेनुरूपेण सा देवी मम पापं व्यपोहतु ।।**
**इति प्रदक्षीणीकृत्य जलधारां कृत्वा प्रार्थयेत्-**
**गवामंगेषु तिष्ठन्ति भुवानानि चतुर्दश ।**
**यस्मात्तस्मात् शिवं मे स्यात् इहलोके परत्र च ।**

ततः धेनुं यथाशक्त्या वस्त्र-अलंकारादिभिः अलं कुर्यात् ।। तत् यथा- स्वर्णशृगीं-रौप्यखुरां-ताम्रपृष्ठीं-घंटाग्रैवेयां मुक्ता-फललांगुलां-कांस्य-पात्रदोहिनीम्- इति सर्वाभरणभूषितां गां श्वेतवस्त्रादिभिः भूषयित्वा

Scanned by CamScanner

पूजयेत्-

ध्यानम् - क्षिराब्धिसंभवे देवि मुक्तादामविराजिते ।
सुधारूपे हव्यभुंक्ते नमोऽस्तु सुरवंदिते ॥
श्री गवे नमः ध्यायामि ॥ ध्यानार्थे पुष्पाणि सम०

आसनम् - धेनुके सर्वभूतानां तारके विश्ववंदिते ।
पवित्रे निर्मले देवि आसनं प्रतिगृह्यताम् ॥
श्री गवे नमः आसनार्थे पुष्पाणि समर्पयामि ॥

पाद्यम् - सौरभेयि सर्वहिते पवित्रे पापनाशिनि ।
गृहाणैतन्मया दत्तं पाद्यं त्रैलोक्य वंदिते ॥
श्री गवे नमः पादेषु पाद्यं समर्पयामि ॥

अर्घः- अष्ठगंधसमायुक्तं स्वर्णपात्र-प्रपूरितं ।
अर्घ गृहाण मद्दत्तं कामधेनो नमोऽस्तु ते
श्री गवे नमः अर्घ सम ०॥

आचमनम् - सर्वलोकस्य या शक्तिः ब्रह्माविष्ण्वादिभिः स्तुता ॥
ददाम्याचमनं तस्यै धेन्वै देव्यै मनोहरम् ॥
श्री गवे नमः आचमनं सम० ॥

स्नानम् - मन्दाकिन्याः समानितैः हेमांभोरुहवासितैः ।
स्नानं कुरुष्व देवेशि सलिलैश्च सुगंधिभिः ॥
श्री गवे नमः स्नान सम ०॥

पंचामृतम् - पयो दधि धृतं चैव मधु च शर्करा तथा ।
पंचामृतं मया नीतं स्नानार्थे प्रतिगृह्यताम् ॥
श्री गवे नमः एकतंत्रेण पंचामृतस्नानं सम०॥

शुद्धोदकम् - गंगा-सरस्वति-रेवा पयोष्णी-नर्मदाजलैः ।
स्नापिताऽसि मया देवि अतः शांति प्रयच्छ मे ॥
श्री गवे नमः शुद्धोदकस्नानं समर्प ०॥

तीर्थोदकम् - तोयं तव महादेवि कर्पूरागरुवासितम् ।
तीर्थेभ्यश्य समानीतं स्नानार्थे प्रतिगृह्यताम ॥
श्री गवे नमः तीर्थोदकस्नानं सम ०॥

वस्त्रोपवस्त्रम् - आच्छादनं गवे दद्यात् सम्यक् शुद्धे सुशोभने ।
सुरभिः वस्त्रदानेन प्रसन्ना भव सर्वदा ॥
दिव्यांबरं नूतनं हि क्षौमं त्वतिमनोहरम् ।
दीयमानं मया देवि गृहाण जगदंबिके ॥

श्री गवे नमः वस्त्रोपवस्त्रम् सम ०॥
ततः शृंगभूषणार्थ सुवर्ण-चरणभूषणार्थे रजतं-
भालभूषार्थँ आदर्श-नेत्रभूषार्थँ रत्नद्वयं-कंठ भूषार्थँ
घंटा-पुष्पमालां च सर्वावयवभूषार्थं पट्टदुकूले-पृष्ठ
भूषार्थ ताम्रं-पुच्छभूषणार्थं मुक्ताफलस्त्रजम् इति
अलंकृत्य

**चंदनम् -** रक्तचन्दनंसंमिश्रं पारिजातसमुद्भवम् ।
मया दत्तं गृहाणाशु चंदनं गंधसंयुतम् ॥
कुंकुमं कामदं दिव्यं कुंकुमं कामरूपिणम् ।
कुंकुमेनार्चिता देवी प्रसीद परमेश्वरि ॥
श्री गवे नमः चंदनं कुंकुमं च सम ०॥

**अक्षताः-** अक्षतान्निर्मलान्शुद्धान् मुक्तामणिसमन्वितान् ।
गृहाणैमान् कामधेनो देहि मे निर्मलां श्रियम् ॥
श्री गवे नमः निर्मलान् अक्षतान् सम ०॥

**पुष्पाणि :-** मंदार-पारिजाताद्याः पाटली-केतकी तथा ।
तुलसी-मोगंर चैव गृहाणाशु नमो नमः ॥
पद्म-शंख-जपापुष्पैः शतपत्रैश्च गुंफिताम् ।
पुष्पमालां प्रयच्छामि स्वीकुरु त्वं सुरेश्वरी ॥
श्री गवे नमः पुष्पाणि पुष्पमालां च सम ०॥

**दुर्वाकुरान्-** विष्ण्वादिसर्वदेवानां गजाननप्रियां शुभाम् ॥
क्षीरसागरसंभूते दुर्वां स्वीकुरु सर्वदा ॥
श्री गवे नमः सर्वदेवप्रियां सुदुर्वां सम ०॥

**अत्तरम् -** स्नेहं गृहाण स्नेहेन लोकेश्वरि दयानिधे ।
सर्वलोकस्य जननि ददामि स्नेहमुत्तमम् ॥
श्री गवे नमः सुगंधिस्नेहं अत्तरं च सम ०॥

अथ प्रत्यंगपूजां कुर्यात्-स च गंधाक्षतपुष्पैःकुर्यात्-हस्ते गंधाक्षतपुष्पाणि आदाय-श्री गवे नमः पादौ पूजयामि ॥ जगन्मात्रे० गुल्फौ पूज ०॥ विष्णुपदस्थितायै ० कटी पूज ॥ नंदिन्यै ० उदरं पूज ०। पंचगव्यप्रसूत्यै ० हृदयं पूज ०॥ वशिष्ठपूजितायै ० मुखं पूज ०॥ दिलीपसेवितायै ० नासिकां पूज ०॥ पृथ्वीरूपधारिण्यै ० नेत्रे पूज ०॥ जगत्पाविन्यै

भ्रूमध्ये पूज ०।। कपिलायै भालं पूज ०।। यमुनायै शिरः पूज ०।। विष्णुरूपिण्यै सर्वांगं पूजयामि ।। अथ गोशृंगमूले ब्रह्मविष्णुभ्यां नमः ब्रह्मविष्णू पूजयामि ।। शिरोमध्ये शिवाय ० शिवं पूज ०।। शृंगाग्रे ० सर्वतीर्थेभ्यःनमः सर्वेतिर्थाति पूज ०। ललाटे पार्वत्यै ० पार्वतिं पूज ०। नासिकायां षण्मुखाय ० षण्मुखं पूज ०। नासापुटयोः कंबल-अश्वतराभ्यां ० कंबलअश्वतरौ पूज ०। चक्षुषोः शशि-भास्कराभ्यां ० शशिभास्करौ पूज ०। दंतेषु वायवे ० वायुं पूज ०।। कर्णयोः अश्विभ्यां ० अश्विनौ पूज ०। जिह्वायां वरुणाय ० वरुणं पूज ०। हुंकारे सरस्वत्यै ० सरस्वतीं पूज ०। गंडयोः पक्षमासाभ्यां ० पक्षमासौ ० पूज ०। ओष्ठयोः संध्याद्वयाभ्यां ० संध्याद्वयौ ० पूज ०। ग्रीवायां इंद्राय ० इंद्रं पूज ०। कुक्षिदेशे रक्षोभ्यांः ० रक्षांसि ० पूज ०। उरसि साध्येभ्यः ० साध्यानि पूज ०। पादेषु धर्माय ० धर्मं पूज ०। जंधासु अधर्माय ० अधर्मं पूज ०। खुरमध्ये पन्नगेभ्यः ० पन्नगान् पूज ०। खुरपश्चिमाग्रे अप्सरोभ्यः ० अप्सरसः पूज ०।। पृष्ठे एकादशरुद्रेभ्यः ० एकादशरुद्रान् पूज ०। सर्वसंधिषु वसुभ्यः ० वसून् पूज ०। श्रोणितटे पितृभ्यः ० पितृन् पूज ०। लांगुले सोमाय ० सोमं पूज ०। गुह्ये आदित्यरश्मिभ्यां ० आदित्यरश्मीन् पूज ०। गोमूत्रे गंगायै ० गंगां पूज ०। गोमूत्रे लक्ष्यै ० लक्ष्मीं पूज ०। क्षीरे सरस्वत्यै ० सरस्वतौं पूज ०। दद्धि नर्मदायै ० नर्मदां पूज ०। धृते अग्नये ० अग्निं पूज ०। रोमसु अष्टाविशतिकोटिदेवेभ्यः ०। अष्ठाविंशतिकोटि देवान् पूजया ०। उदरे पृथ्विव्यै ० पृथिवीं पूज ०। पयोधरेषु चतुर्भ्यः समुद्रेभ्यः ० चतुः समुद्रान् पूजयामि ।। एताः देवताः अंगेषु संपूज्य-

**सौभाग्यद्रव्यम्** - श्वेतचूर्णं रक्तचूर्णं हरिद्रां कुंकुमं तथा ।
सिन्दरेण समायुक्तं सौमाग्यं प्रातिगृह्यताम् ।।
श्री गवे नमः सौभाग्यद्रव्यं सम ०।।

**धूपम्** - वनस्पतिरसोद्भूतो गंधाढ्यो गंधउत्तमः ।
आध्रेयःसर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
श्री गवे नमः धूपम् आध्रापयामि ।।

**दीपः**- साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।

Scanned by CamScanner

तमोनाशकरं दीपं गृहाण परमेश्वरि ।
श्री गवे नमः दीपं दर्शयामि ॥

**नैवेद्यम् -** सुरभिस्त्वं जगन्मातः देवि विष्णुपदे स्थिता
सर्वदेवमयि ग्रासं मया दत्तमिमं ग्रस ॥
श्री गवे नमः गोग्रासरूपं नैवेद्यं सम ०॥
एलो शीर-लवंगादि कर्पूर-परिवासितम् ।
प्राशनार्थं कृतं तोयं गृहाण परमेश्वरि ॥
मध्ये पानीयं सम ०।
नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम् ।
षड्रसैःरन्वितं दिव्यं गवे देव्यै नमोनमः ॥
नैवेद्यं श्री गवे नमः इति संप्रोक्ष्य तन्मध्ये
दुर्वां निधाय वं इति धेनुमुद्रया अमृतीइकृत्य
वाम हस्तेन कमलमुद्रां प्रदर्श्य ग्रासमुद्रया
ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ
व्यानाय स्वाहा ॐ उदानाय स्वाहा ॐ समानायस्वाहा
एवं पंचप्राणाहुति इत्वा
**श्री गवे नमः इति मंत्रं द्यादशवारं प्रजपन्**
**देवीं भुजानां विभाव्य उत्तरापोशनं सम०**
**हस्तप्रक्षालनं सम ०।**
**करोद्यर्तनार्थँ गंधयुक्तं पुष्पं सम ०।**

**तांबुलम् -** एलालवंगकर्पूर-नागपत्रादिसंयुतम् ।
पूगीफलेन संयुक्तं तांबूलं प्रतिगृह्यताम ॥
श्री गवे नमः पूगीफलादि-तांबूलं सम ०।

**दक्षिणाः-** हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनंतपुण्यफलदां दक्षिणामर्पयाम्यहम् ।
श्री गवे नमः सुवर्णपुष्पदक्षिणांसम ०।

**आरार्तिकम् -** नीराजनीं प्रज्वाल्य ज्वालामालिन्यैनमः इति गंधाक्षत
पुष्पैः संपूज्य

Scanned by CamScanner

# ॥ सर्वदेवमयी श्री गौमाताकी आरति ॥

जय जय गौमाता मा जय जय गौमाता ।
सकल देहमां देवो (२) सुखपूर्वक वसता-मा जय जय ०॥
तुं अदिति देवमाता वेदमाता शारदा मा वेदमाता शारदा ॥
सकल विश्वनुं पोषण (२) तुं गौरूपे करती- मा जय जय ०॥
पृष्ठे ब्रह्मा कंठे विष्णु मुखमां शिव बेठा-मा मुखमां ०॥
मध्ये सर्वे देवो (२) रोमे ऋषि बेठा- मा जय जय ०॥
श्रृंगे तीर्थो सर्वे भाले पार्वती मा भाले पार्वती ०।
नाके कार्तिक स्वामी (२) नेत्रे चंद्र सूर्ये- मा जय जय ०॥
दांतोमां छे वायु कर्णे अश्विनी कुमार मा कर्णे ०॥
डोके सोहे इन्द्र (२) मा श्रुणमां शारदा-मा जय जय ०॥
पीठे अगियार रुद्रो सांधामां वसुओ मा सांधामां ०।
केडे पितृ सोहे (२) कुक्षे राक्षसो मा-मा जय जय ०॥
चरणमां बेठा धर्म क्षुरे गंधर्वो मा क्षुरे गंधर्वो ०॥
क्षुराग्रे वसे सर्पो (२) क्षुरपृष्ठे अप्सरा मा जय जय ०॥
पुच्छे कुबेर सोहे मुत्रे गंगामा मा मूत्रे ०।
गोमयमां लक्ष्मी बेठां (२) साथे यमुनामा मा जय जय ०॥
दूधमां शारदा बेसे दहीमां नर्मदा मा मा दहिमां ०॥
धृतमां बेठा अग्नि (२) आंचारे समुद्रो-मा जय ०।
अग्रे गायो रहेजो पृष्ठे पण गायो मा मा पृष्ठे ०।
हृदये वसजो गायो (२) रहुं हुं गायोमां मा जय जय ०॥
जय जय गौ माता मा जय जय गौ माता ।
सकल देहमां देवो (२) सुख पूर्वक वसता मा जय जय ०॥

**कपूर गौरं करुणावतारम् ०। मंगल भगवान् विष्णुः ॥ सर्वमंगल मांगल्ये ०॥** श्री गवे नमः आरार्तिक्यं सम ०। जलेन प्रदक्षिणीकृत्य पुष्पैः देवीवंदनम् । हस्ताभ्याम् स्वात्मवंदनम् । हस्तौ प्रक्षाल्य ।

मंत्रपुष्पाजलिम्-विद्याबुध्धिः धनैश्वर्यपुत्रपुत्रादिसंततिम् ।
पुष्पांजलिप्रदानेन देहि मे इप्सितं पदम् ॥
श्री गवे नमः मंत्रपुष्पांजलि सम ०॥

**ततः हस्तयोः श्री फलं गृहित्वा प्रदक्षिणां कुर्यात् ।**

Scanned by CamScanner

# ॥ सर्वदेवमयी श्री गौमाताकी आरति ॥

जय जय गौमाता मा जय जय गौमाता ।
सकल देहमां देवो (२) सुखपूर्वक वसता-मा जय जय ०॥
तुं अदिति देवमाता वेदमाता शारदा मा वेदमाता शारदा ॥
सकल विश्वनुं पोषण (२) तुं गौरूपे करती- मा जय जय ०॥
पृष्ठे ब्रह्मा कंठे विष्णु मुखमां शिव बेठा-मा मुखमां ०॥
मध्ये सर्वे देवो (२) रोमे ऋषि बेठा- मा जय जय ०॥
श्रृंगे तीर्थो सर्वे भाले पार्वती मा भाले पार्वती ०।
नाके कार्तिक स्वामी (२) नेत्रे चंद्र सूर्ये- मा जय जय ०॥
दांतोमां छे वायु कर्णे अश्विनी कुमार मा कर्णे ०॥
डोके सोहे इन्द्र (२) मा भ्रुणमां शारदा-मा जय जय ०॥
पीठे अगियार रुद्रो सांधामां वसुओ मा सांधामां ०।
केडे पितृ सोहे (२) कुक्षे राक्षसो मा-मा जय जय ०॥
चरणमां बेठा धर्म क्षुरे गंधर्वो मा क्षुरे गंधर्वो ०॥
क्षुराग्रे वसे सर्पो (२) क्षुरपृष्ठे अप्सरा मा जय जय ०॥
पुच्छे कुबेर सोहे मुत्रे गंगामा मा मूत्रे ०।
गोमयमां लक्ष्मी बेठां (२) साथे यमुनामा मा जय जय ०॥
दूधमां शारदा बेसे दहीमां नर्मदा मा मा दहिमां ०॥
धृतमां बेठा अग्नि (२) आंचरे समुद्रो-मा जय ०।
अग्रे गायो रहेजो पृष्ठे पण गायो मा मा पृष्ठे ०।
हृदये वसजो गायो (२) रहुं हुं गायोमां मा जय जय ०॥
जय जय गौ माता मा जय जय गौ माता ।
सकल देहमां देवो (२) सुख पूर्वक वसता मा जय जय ०॥

**कपूर गौरं करुणावतारम् ०। मंगल भगवान् विष्णुः ॥ सर्वमंगल मांगल्ये ०॥** श्री गवे नमः आरार्तिक्यं सम ०। जलेन प्रदक्षिणीकृत्य पुष्पैः देवीवंदनम् । हस्ताभ्याम् स्वात्मवंदनम् । हस्तौ प्रक्षाल्य ।

मंत्रपुष्पाजलिम्-विद्याबुध्धिः धनैश्वर्यपुत्रपुत्रादिसंततिम् ।
पुष्पांजलिप्रदानेन देहि मे इप्सितं पदम् ॥

श्री गवे नमः मंत्रपुष्पांजलि सम ०॥

**ततः हस्तयोः श्री फलं गृहित्वा प्रदक्षिणां कुर्यात् ।**

Scanned by CamScanner

गावो मे अग्रतःसंतु गावो म सन्तु पृष्ठतः ।
गोवो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ॥
तानि सर्वाणि नश्यन्तु प्रदक्षिणां पदे पदे ॥
इति त्रिवारं प्रदक्षिणां कृत्वा श्रीफलं गोः
दक्षिणपदे समर्पयेत् ततः प्रार्थयेत् ॥

## प्रार्थना-

पंचगावः समुत्पन्ना मथ्यमाने महोदधौ ।
तासां मध्ये तु या नन्दा तस्यै धेन्वै नमो नमः ॥१॥
पृष्ठे ब्रह्मा गले विष्णुः मुखे रुद्रः प्रतिष्ठितः ।
मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥२॥
सर्पाः पुच्छे खुराग्रेषु ये चाष्टौ कुलपर्वताः ।
मूत्रे गंगादयो नद्यः नेत्रयोः शशिभास्करौ ॥३॥
स्तनेषु च स्थिता देवाः सा धेनु वरदाऽस्तु मे ।
या लक्ष्मीः सर्वभूतानां यच्च देवेष्ववस्थिता ॥४॥
विष्णोर्वक्षिसि या लक्ष्मीः स्वाहा या च विभावसोः ।
चन्द्रार्क – शक्रशक्ति र्या सा धेनु वरदाऽस्तु मे ॥५॥
चतुर्मुखस्य या लक्ष्मीः या लक्ष्मी धनदस्य च ।
या लक्ष्मिर्लोकपालानां सा धेनु वरदाऽस्तु मे । ॥६॥
या स्वधा पितृमुख्यानां स्वाहा यज्ञभुजां तथा
सर्वपापहरा धेनुः तस्मात्शांतिं प्रयच्छ मे ॥७॥
अदितिर्देवमाता च वेदमाता च धीश्वरि ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥८॥
यज्ञसाधनभूता या विश्वस्याधौधनाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥९॥
श्री गवे नमः प्रार्थनापूर्वकं नमस्करोमि ॥

इति गोपूजनं कृत्वा गोदानप्रतिग्रहितारं ब्राह्मणं वृणीयात् ॥

## गोदाता हस्ते पुगीफलं गृहित्वा-

अमुक गोत्रोत्पन्नः अमुकशर्मा (वर्माः-गुप्तःदासः) अहं अमुक

गोत्रोत्पन्नं अमुकशर्माणं ब्राह्मणं गोप्रतिग्रहकर्तारं त्वाम् अहं वृणे । वृतोऽस्मि इति विप्रो ब्रूयात् ततः ब्राह्मणं गंध-अक्षत-वस्त्र-पुष्पमाला दक्षिणादिना यथा विभवं संपूज्य गोदानसंकल्पं कुर्यात्-

हस्ते सजलं तिलकुसुमाक्षतं गृहीत्वा अत्राद्य महामांगल्यफलपदे अमुक मासे अमुक पक्षे अमुक तिथौ अमुक वासरे अमुक नक्षत्रे अमुक योगे अमुक करणे अमुक राशि स्थिते चन्द्रे अमुक राशि स्थिते श्री सूर्ये अमुक राशि स्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिंस्थानस्थितेषु सत्सु एवं ग्रहगणविषेषेण विशिष्टायां शुभपुछयतिथौ अमुक गोंत्रोत्पन्नस्य अमुकस्य यजमानस्य मम इह जन्मनि-जन्मान्तरे च अज्ञानवशकायिक-वाचिक-मानसिक-पापक्षयार्थं निखिल दुःख-दारिद्र्य-दुर्भाग्य निवृतिपूर्वकं आयुः-आरोग्य-धन-धान्य-संप्राप्ति कामः इष्टदेवचरणकमले अखंडभक्तिपूर्वकं नित्यनिवासार्थं वैतरणीसंज्ञकनदी-उत्तारणपूर्वकं गोलोकधामगमनकामः विष्णुदेवताप्रीत्यर्थं इमां प्रत्यक्ष-धेनुं सुवर्णशृगीं मुक्तालांगूलां-कांस्योपदोहिनीं सर्वाभरण भूषितां-सोपस्करां रुद्रदेवत्यां श्री महाविष्णुरूपनंदनंदनस्य प्रीत्यर्थं अमुक गोत्रोत्पन्नाय अमुकं प्रवरान्विताय सुपूजिताय अमुक शर्मणे तुभ्यं अहं संप्रददे

यज्ञसाधनभूता या विश्वस्याघौधनाशिनी ॥
विश्वरूपधरो देवः प्रीयतां अनया गवा ॥

इति मंत्रं उक्त्वा (तिल पात्रे धृताक्तं गोपुच्छं कृत्वा) विप्र हस्ते सतिलकुशोदकं दद्यात् ॥ विप्रःसतिलाक्षतयुक्तं गोपुच्छं गृहित्वा स्वस्ति इति प्रतिवचनं ब्रूयात् ॥ हस्ते जलं गृहित्वा-कृत-एतत् गोदान प्रतिष्ठा सिदध्यर्थ संपूर्णफलप्राप्तिअथँ सुवर्णपुष्पदक्षिणां दत्वा प्रार्थयेत् ॥

नमो गोभ्यः श्रीमतीभ्यश्च सोरमेयीभ्य एवच ।
नमो ब्रह्मस्तुताभ्यश्च पवित्राभ्यो नमो नमः ॥

इति प्रार्थयित्वा धेनुं च विप्रं त्रिःप्रदक्षिणीकृत्य गोमतीं च प्रठेत्-

गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः । ॥१॥
सुरभ्यःसौरभेयश्च सरितः सागरं यथा

Scanned by CamScanner

याः पश्याम्यहं नित्यं गावः पश्यंतु मां सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥२॥
गावो सुरभयो नित्यं गावोः गुग्गुलगंधिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥३॥
अन्नं चापशे गावो देवानां हविःउत्तमम्।
यावन्ति सर्वभूतानि दृक्षंति च वहंति च ॥४॥
हविषा मंत्रपूतेन तर्पयन्त्यमरा दिवि ।
ऋषिणां अग्निहोतृणां गावो होमे प्रतिष्ठिताः ॥५॥
गावः पवित्रं परमं गावो मंगलमुत्तमम् ।
गावो गोलोकसोपानं गावो धन्याःसनातनाः ॥६॥

**इति गोस्तुतिं कृत्वा सवत्सां च विप्रं साष्टांगं प्रणम्य-**

उरसा शिरसा दृष्टया मनसा वचसा तथा ।
पदभ्यां कराभ्यां जानुभ्यां प्रणामोष्टांग उच्यते ॥ विसर्जयेत् गोपुंच्छं स्वकरे गृहित्वा सप्तपदानि अनुव्रजेत् इति अनुव्रज्य वंदनं कृत्वा परावृत्य स्वासने उपविश्य अपवित्रः पवित्रो वा० । इति मंत्रेण स्वशरीरं संप्रोक्ष्य-पवित्रो भूत्वा आचार्यं संपूज्य यथांशकितदक्षिणां दद्यात् । जलमादाय कृतेस्मिन् कर्मणि न्युनातिरिक्तदोषपरिहारार्थं वृतेभ्यः ब्राह्मणेभ्यःभूयसी दक्षिणां दास्ये प्रार्थयेत् ।

श्रीकृष्णः प्रतिगृहणाति श्रीकृष्णो वै ददाति च ॥
श्रीकृष्णः तारकोऽस्माकं श्रीकृष्णाय नमो नमः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥
ॐ विष्णवे नमः विष्णवे नमः विष्णवे नमः॥
ततः विप्राशिषः गृहित्वा गुड्भक्षणं कृत्वा विप्रान् भोजयित्वा बंधुभिः सहभुंजीत ॥

# ॥ इति सविधि प्रत्यक्ष गोदान प्रयोगः ॥

Scanned by CamScanner

# શ્રીદક્ષિણામૂર્તિનું વર્ણન

શ્રીદક્ષિણામૂર્તિ એ શ્રીમહેશ્વરનું એક નામ છે. શુદ્ધસત્વ ગુણ જેમાં પ્રધાન છે. એવી પ્રકૃતિને માયા કહેવામાં આવે છે, તે નિયામક વેદમાં મહેશ્વર એવા નામથી પ્રસિદ્ધ છે. શ્રીદક્ષિણામૂર્તિએ શ્રીસનકાદિકને ભદ્રમુદ્રા વડે તત્વજ્ઞાનનો ઉપદેશ કર્યાનું સંપ્રદાયે નીચે પ્રમાણે નિરૂપણ કર્યું છે -

શ્રીસનકાદિક ચાર બંધુઓને કોઇ વેળા તત્ત્વજ્ઞાન સંપાદન કરવાની પ્રબલ જિજ્ઞાસા પ્રકટી, તેથી તેઓ સમિત્પાણી થઇ, વિનયપૂર્વક ભગવાન બ્રહ્માને શરણે ગયા. ત્યાં તેમની રાજસી પ્રવૃતિ જોઇને તેઓની તેમનામાં શ્રદ્ધા પ્રકટી નહિં, એટલે તત્વજ્ઞાન-સંબધી કાંઇ પણ પૃચ્છા તેમને તેમણે ન કરી. પછી તેઓ ભગવાન વિષ્ણુની પાસે ગયા. ભગવાન વિષ્ણુને શ્રી લક્ષ્મીસાથે વિનોદમાં પ્રવૃત જોઇ. તેમની તેમને વિષે પણ શ્રદ્ધા ન ઉપજી, તેથી તેમને પણ તત્ત્વજ્ઞાનસંબધી કાંઇ પણ પ્રશ્ન ન કરતાં કૈલાસમાં ભગવાન્ રુદ્રની પાસે તેઓ ગયા. ભગવાન રુદ્રને પોતાના ગણોની સાથે યથેષ્ટ વિહાર કરતા જોઇ તેમનામાં પણ તેઓને શ્રદ્ધા બેઠી નહિ. પછી તેઓ ઉદાસ થઇ તત્ત્વજ્ઞાન માટે અંતર્યામિની પ્રાર્થના કરતા કૈલાસપર્વત ઉપર વિચારવા લાગ્યા. તેમની શુદ્ધભાવવાળી પ્રાર્થનાથી પ્રસન્ન થયેલા અંતર્યામિરૂપ શ્રીમહેશ્વર તેમને તત્ત્વોપદેશ આપવામાટે ભવ્ય ભદ્રવટની નીચે ભદ્રમુદ્રાસહિત શ્રીદક્ષિણામૂર્તિરૂપે પ્રાદુર્ભાવ પામ્યા. તેમની કિશોરઅવસ્થાવાળી અત્યંત સૌમ્યમુર્તિ જોઇને ચારે ભાઇઓને તેમનામાં અત્યંત શ્રદ્ધા ઉપજી પછી તેમણે કરેલી ભદ્રમુદ્રા જોઇને તેઓ અમારા પ્રતિ આ પ્રર્માણે ઉપદેશ કરે છે. એમ વિચાર કરતાં તેમને જણાયું -

"ત્રણ ગુણથી પૃથક થયેલો જીવ બ્રહ્મરૂપ છે, અને તે બ્રહ્મ અનાદિ અનંત છે, વળી જીવના હૃદયમાં જે અવિદ્યારૂપી મોટો દુઃખનો કાંટો લાગ્યો છે તેને કાઢવા માટે આ બ્રહ્મજ્ઞાનરૂપ ચીપીયો સર્વોત્તમ છે".

તે પ્રમાણે મનવડે નિશ્ચય થતાં તેમનાં ચિત્તની બ્રહ્મમાં એકાગ્રતા થઇ એવી રીતે ભદ્રમુદ્રારૂપ મૌનવ્યાખ્યાન વડે સદ્ગુરુરૂપ શ્રીદક્ષિણામૂર્તિએ શ્રીસનકાદિકને ઉપદેશ કર્યો છે.

ભગવાન શિવ સચ્ચિદાનંદ સ્વરૂપ, નિર્ગુણ, નિર્વિકાર પરીપૂર્ણ છે એજ પરબ્રહ્મત્વ સગુણ સ્વરૂપે વિશ્વની ઉત્પતિ સ્થિતિ અને લયના કારણરૂપ પરમાત્મા પરમેશ્વર છે અને આ પરમેશ્વર તેજ સર્વ વિદ્યાના અધિષ્ઠતા સ્વામી હોઇ મુમુક્ષુઓના અનુગ્રહાર્થે બ્રહ્મવિદ્યાનો ઉપદેશ આપનાર આચાર્ય, ગુરુ શ્રી દક્ષિણામૂર્તિ છે. એ દક્ષિણામૂર્તિ ગુરુનું આ સ્તોત્ર છે.

Scanned by CamScanner

"चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्याऽस्तु छीन्नसंशयाः ॥"

આ પ્રમાણે મન વડે નિશ્ચય થતાં ચિત્તની એકાગ્રતારૂપ વૃતિ થઇ એવી રીતે; ભદ્રામુદ્રારૂપ મૌન વ્યાખ્યાન વડે સદગુણરૂપ શ્રી દક્ષિણમૂર્તિરૂપે ભગવાન મહેશ્વર જં છે

॥ श्रीदक्षिणामूर्ति ध्यानम् ॥

मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानं ।
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ॥
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं ।
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥
ईश्वरो गुरुरात्मेति मूर्तिभेदविजागिने ।
व्योमवद् व्याप्तदेहाय श्री दक्षिणामूर्तये नमः ॥

## ॥ अथ श्रीदक्षिणामूर्तिस्तोत्रम् ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं,
पश्यन्नात्मनि मायया बहिरिवाद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयम्,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥१॥

અર્થ :- દર્પણમાં દેખાતી પ્રતિબિંબિત નગરીની પેઠે પોતાના અંતઃકરણમાં રહેલા વાસનામય વિશ્વને જેમ નિદ્રાએ કરીને બહારના જેવું દેખીએ છીએ તેમ આત્મામાં કલ્પિત રીતે રહેલા આ જગતને માયાએ ને દૃશ્યની વાસનાએ કરી બહાર ઉદ્ભૂતની પેઠે દેખાતાં છતાં જે આત્માના જ્ઞાનના સમયમાં અદ્વયરૂપ પોતાના આત્માજને અપરોક્ષ કરે છે તે શ્રીસદગુરુની મૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ દીનભાવવાળા નમસ્કાર હો. ૧

बीजस्यांतरिवांकुरो जगदिदं प्राङ्निर्विकल्पंपुनर्,
मायाकल्पितदेशकालकलनावैचित्रीकृतम् ।
मायावीव विजृंमयत्यपि महायोगीव यः स्वेच्छया,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥२॥

અર્થ :- વૃક્ષાદિના બીજની અંતર્ સૂક્ષ્મ અંકુરની પેઠે આ પ્રતીતી થતું જગત્ પૂર્વે નિર્વિકલ્પ (નામરૂપાદિની કલ્પનાથી રહિત) હતું, પછી પોતાની માયા વડે જેમણે કલ્પિત દેશકાલની કલ્પનાથી નામરૂપાદિની વિચિત્રતાએ કરી વિચિત્રની પેઠે સ્વેચ્છાએ

Scanned by CamScanner

આ સંસારરૂપ વિલક્ષણ વિલાસને કરે છે તે શ્રીસદ્ગુરુની મૂર્તિરૂપ શ્રી દક્ષિણામૂર્તિને મારા આ દીનભાવવાળા નમસ્કાર હો. ૨

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते,
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥३॥

**અર્થ :-** જેનું સ્ફુરણ (જ્ઞાન) સદ્રૂપ છતાં અસત્ના જેવા આ દૃશ્ય પદાર્થોમાં અનુસ્યૂત (પરોવાઇને રહેલું) ભાસે છે, અને જે તત્ત્વમસિ (તે બ્રહ્મ તું છે) આ છાંદોગ્યોપનિષદ્ના વચનવડે શરણાગતોને બ્રહ્માનો સાક્ષાત્ બોધ કરે છે, વળી જેના દૃઢ સાક્ષાત્કારથી આ દુઃખમય સંસારસાગરમાં બ્રહ્મજ્ઞાનીનો પુનર્જન્મ થાય નહિ તે શ્રી સદ્ગુરૂરૂપમૂર્તિને-શ્રીદક્ષિણામૂર્તિને મારા આ દીનતાયુક્ત નમસ્કાર હો. ૩

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं,
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पंदते ।
जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत्,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥४॥

**અર્થ :-** ઘણાં છિદ્રવાળા ઘડાના ઉદરમાં રહેલા મોટા પ્રકાશમય દીવાના પ્રકાશ જેવું પ્રકાશવાળું જેનું જ્ઞાન સ્થૂલશરીરમાંથી ચક્ષુઆદિ ઇંદ્રિયો દ્વારા બહાર સ્ફુરે છે. હું જાણું છું એવી રીતે પ્રથમ તેનાજ ભાસમાન થયા પછી આ સમસ્ત જગત્ ભાસે છે તે શ્રી સદ્ગુરૂમૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ દીનભાવવાળા નમસ્કાર હો. ૪

देहं प्राणमपींद्रियाण्यपि चलां बुद्धिं च शून्यं विदुः,
स्त्रीबालांधजडोपमास्त्वहमिति भ्रांता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे,
तस्मै श्रीगुरुमूर्तये नमः इदं श्रीदक्षिणामूर्तये ॥५॥

**અર્થ :-** સ્ત્રી, બાળક, અંધ અને જડની ઉપમાવાળા ચાર્વાક આદિ ઘણા ભ્રાંત વાદિપૂરૂષો તો સ્થૂલદેહને, મુખ્યપ્રાણને, અગીયાર ઇંદ્રિયોને, ચંચલસ્વાભાવવાળી બુદ્ધિને અને શૂન્યને (અભાવે) હું છું (એ મારું સાચું સ્વરૂપ છે) એમ જાણે છે તે માયાશક્તિના કાર્યરૂપ આ કલ્પિત ને દુઃખદ મહાવ્યામોહનો સંહાર કરનાર શ્રીસદ્ગુરૂની મૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ શ્રદ્ધાભક્તિવાળા નમસ્કાર હો. ૫

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्,
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।

Scanned by CamScanner

प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते,
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते ॥६॥
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥६॥

અર્થ :- આવરણ કરવાના સ્વભાવવાળી માયાવડે સારી રીતે આચ્છાદિત થવાથી અંધકારમય રાહુવડે ઘેરાયેલા પ્રકાશમય સૂર્ય અને સુષુપ્તિને પામ્યો હતો, અને જે જાગ્રના સમયમાં હું પૂર્વે સૂતો હતો એમ પ્રત્યભિજ્ઞાનનો (પૂર્વેઅનુભવેલાના પુનઃ જ્ઞાનનો) વિષય કરાય છે તે શ્રીસદગુરૂમૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ સવિનય નમસ્કાર હો. ૬

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि,
व्यावृत्तास्वनुवर्तमानमहमित्यंतः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो भद्रया मुद्रया,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥७॥

અર્થ :- બાલ્યાદિક તેમજ જાગ્રદાદિક પરસ્પરભિન્ન તનમનની સર્વે અવસ્થાઓ-વિષે અનુવર્તમાન, (તે તે અવસ્થારૂપે પ્રતીતી થતા,) અને હું છું એમ શરીરની અંતર સદા સ્ફુરવાળા પોતાના સ્વરૂપનું શ્રદ્ધાપ્રીતિથી ભજન કરવાવાળાની મધ્યે જે ભદ્રમુ-દ્રાવડે પ્રકટ કરે છે તે શ્રીસદગુરૂમૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ વિનયપૂર્વક નમસ્કાર હો. ૭

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः,
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥८॥

અર્થ :- જે આ પુરૂષ (જીવ) માયાવડે ચારે ગમથી ભ્રાંતિને પામેલો અંતઃકરણની સ્વપ્નાવસ્થાવિષે અથવા જાગ્રદવસ્થાવિષે કાર્ય કારણ ભાવવડે, સ્વસ્વામિસંબધવડે અને શિષ્યઆચાર્ય ભાવવડે તેમજ પિતાપૂત્ર આદિ ભિન્ન ભિન્ન સ્વરૂપવડે ભેદથી આ વિશ્વને દેખે છે તે શ્રીસદગુરુમૂર્તિરૂપ શ્રી દક્ષિણામૂર્તિ ને મારા આ દિનભાવે નમસ્કાર હો. ૮

भूरंभांस्यनलोऽनिलोंबरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किंचन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥९॥

અર્થ :- પૃથ્વીજલ તેજ, વાયુ, આકાશ, સૂર્ય, ચંદ્ર અને પૂરુષ (જીવ) એવા આ સ્થાવરજંગમરૂપ જે પરમાત્માની મૂર્તિનું અષ્ટક લોકોને જણાય છે, અને પરમાત્માનો

Scanned by CamScanner

વિચાર કરવાવાળા પુરૂષને જે વિભુરૂપ પરમાત્માથી ભિન્ન બીજું કોંઇ પણ અહીં વિદ્યમાન જણાતું નથી તે શ્રીસદગુરૂમૂર્તિરૂપ શ્રીદક્ષિણામૂર્તિને મારા આ સવિનય નમસ્કાર હો. ૯

सर्वात्मत्वमितिस्फुटीकृतमिदं यस्मादमुष्मिंस्तवे,
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः,
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥१०॥

**અર્થ :-** જેથી આ શ્રીદક્ષિણામૂર્તિસ્તોસ્ત્રમાં એમ આ જીવના વાસ્તવિક સ્વરૂપનો સર્વાત્મભાવ સ્પષ્ટ કર્યો છે તે હેતુથી આ સ્તોસ્ત્રનું શ્રદ્ધાપૂર્વક શ્રવણથી તથા આ સ્તોત્રના અર્થના મનનથી અને શ્રદક્ષિણામૂર્તિના ધ્યાનથી તથા તેમના નામના સંકીર્તનથી વ્યાવહારિક મહાવિભૂતિસહિત સર્વાત્મભાવરૂપ ઇશ્વભાવ આવો શુભ પ્રયત્ન કરનારા મનુષ્યને સ્વતઃસિદ્ધ થાય છે. વળી આ સ્તોત્રના પાઠ આદિ કરનારને સૂક્ષ્મ ને મહાન્ ઇત્યાદિ આઠ પ્રકારથી વિવર્તપરિણામને પામેલા બ્રહ્મારૂપ અભંગ ઐશ્વર્યની પ્રાપ્તિ પણ થાય છે. ૧૦

## ક્ષેપક શ્લોકો

वटविटपसमीपे भूमिभागे निषण्णं,
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं,
जननमरणदुःखच्छेददक्षं नमामि ॥११॥

**અર્થ :-** કૈલાસપર્વતપર ભદ્રવટનામના રમણીય વડની વૃક્ષની સમીપમાં નીચેની ભૂમિના ભાગપર બેઠેલા સર્વ જિજ્ઞાસુ મુનિ જનોને કેવલ દયાથી બ્રહ્મજ્ઞાન દેનારા, ત્રણે લોકના પરમગુરૂ, ઇશ્વર (જગતના નિયંતા) ને જન્મમરણાદિરૂપ દુઃખનો તુરત નાશ કરવામાં અતિચતુર શ્રીદક્ષિણામૂર્તિને હું શ્રદ્ધાભક્તિથી નમસ્કાર કરું છું. ૧૧

चित्रं वटतरोर्मूले, वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तुमौनं व्याख्यानं, शिष्यास्तु च्छिन्नसंशयाः ॥१२॥

**અર્થ :-** પૂર્વોક્ત વડના ઝાડના મૂલમાં વયોવૃદ્ધ શિષ્યો અને શ્રીદક્ષિણામૂર્તિરૂપ યુવાન્ મહાપુરુષ સ્થિત છે. વળી તે સદગુરુનુ ભદ્રામુદ્રારૂપ મૌન વ્યાખ્યાન છે, અને તેમના સનકાદિક શિષ્યો સંશય રહિત થયા છે એ બહુ આશ્ચર્યની વાત છે. ૧૨

Scanned by CamScanner

ओम नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशांताय, दक्षिणामूर्तये नमः ॥१३॥

અર્થ :- પ્રણવના અર્થરૂપ ને શુદ્ધજ્ઞાનનીજ પ્રત્યક્ષમૂર્તિરૂપ શ્રી દક્ષિણામૂર્તિને મારા નમસ્કાર હો. અતિનિર્મલ ને પ્રશાંત એવા શ્રી દક્ષિણામૂર્તિને મારા પુનઃ ભાવ-પૂર્વક નમસ્કાર હો. ૧૩

निधये सर्वविद्यानां, भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥१४॥

અર્થ :- સર્વ વિદ્યાઓના મોટા ભંડારરૂપ, ભવરોગીઓના સાચા વૈદ્ય અને સર્વ લોકોના હિતોપદેષ્ટા સાચા સદગુરુ શ્રીદક્ષિણામૂર્તિને મારા શ્રદ્ધાભક્તિપૂર્વક વારંવાર નમસ્કાર હો. ૧૪

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तै सदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलित चिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥१५॥

